# संस्कृत पुस्तक–8

( आठवीं कक्षा के लिए )

# पंजाब स्कूल शिक्षा बोर्ड

साहिबज़ादा अजीत सिंह नगर

© पंजाब सरकार

**संशोधित संस्करण : 2016......................11,000 प्रतियाँ**

All rights, including those of translation, reproduction and annotation etc., are reserved by the Punjab Government

**लेखक:**

| | |
|---|---|
| मथुरा दत्त पाण्डेय | तिलक राज शर्मा |
| कृष्ण गोपाल अत्रेय | बाल कृष्ण वर्मा |
| प्रियतम चन्द्र | इन्दिरा देवी |

*सम्पादिका* — सरोज आर्य

*संशोधक* — डॉ० शोभा रानी

**चेतावनी**

1. कोई भी एजेंसी-होल्डर अधिक पैसे लेने के उद्देश्य से पाठ्य-पुस्तकों पर जिल्दबन्दी नहीं कर सकता। (एजेंसी-होल्डरों के साथ हुए समझौते की धारा नं. 7 के अनुसार)
2. पंजाब स्कूल शिक्षा बोर्ड द्वारा मुद्रित तथा प्रकाशित पाठ्य-पुस्तकों का जाली प्रकाशन, जमाखोरी या बिक्री आदि करना भारतीय दंड प्रणाली के अन्तर्गत गैरकानूनी है।
(पंजाब स्कूल शिक्षा बोर्ड की पाठ्य-पुस्तकें बोर्ड के 'वाटर मारक' वाले कागज़ के ऊपर ही मुद्रित की जाती हैं।)

**मूल्य : ₹ 26.00**

**सचिव,** पंजाब स्कूल शिक्षा बोर्ड, विद्या भवन फेज़-8, साहिबज़ादा अजीत सिंह नगर-160062 द्वारा प्रकाशित एवं मैसर्स नोवा पब्लिकेशन्ज़, सी-51, फोकल प्वाईंट एक्सटेन्शन, जालन्धर द्वारा मुद्रित।

# प्राक्कथन

पंजाब स्कूल शिक्षा बोर्ड का प्रमुख उत्तरदायित्व स्कूल स्तरीय सभी विषयों के पाठ्यक्रम तैयार करना, उन पाठ्यक्रमों के अनुसार पाठ्य-पुस्तकें तैयार करना तथा उन्हें नवीन शिक्षा नीति के अनुसार संशोधित करना है। संशोधित पाठ्यक्रमों के आधार पर विभिन्न विषय की पाठ्य-पुस्तकें तैयार की जा रही हैं। इसी कार्यक्रम के अन्तर्गत प्रवेश वर्ष 1998 से संस्कृत विषय की सभी पाठ्य–पुस्तकों के नवीनीकरण की क्रमिक योजना बनाई गई है।

छठी एवं सातवीं श्रेणी की पाठ्य-पुस्तकों का नवीनीकरण पहले ही किया जा चुका है। हस्तीय पुस्तक इसी शृंखला की अगली कड़ी है। यह पुस्तक प्रवेश वर्ष 2000 से आठवीं श्रेणी के लिए संशोधित पाठ्यक्रम के अनुसार तैयार की गई है। पुस्तक को विद्यार्थियों के मानसिक स्तरानुरूप बनाने का यथेष्ट प्रयत्न किया गया है। निर्धारित व्याकरण तथा शब्द कोश को पाठ्य-पुस्तक का अंग बना दिया गया है।

आशा की जाती है कि यह पुस्तक विद्यार्थियों तथा अध्यापकों के लिए लाभदायक सिद्ध होगी। फिर भी पुस्तक को और अधिक लाभदायक बनाने के लिए विद्वानों द्वारा दिए गए सुझाव, बोर्ड द्वारा सादर स्वीकार किए जाएंगे।

**चेयरपर्सन**
पंजाब स्कूल शिक्षा बोर्ड

# विषय-सूची


| क्रमांक | विषय | पृष्ठांक |
|---|---|---|
| प्रथमः पाठः | ईश-वन्दना | 1 |
| द्वितीयः पाठः | परिचयः | 3 |
| तृतीयः पाठः | अस्माकं पुस्तकालयः | 6 |
| चतुर्थः पाठः | सूक्तयः | 9 |
| पञ्चमः पाठः | सिद्धार्थः | 11 |
| षष्ठः पाठः | समाचार-पत्रम् | 14 |
| सप्तमः पाठः | श्री गुरुः गोबिन्दसिंहः | 17 |
| अष्टमः पाठः | सुभाषितानि | 20 |
| नवमः पाठः | दुर्बुद्धिः कच्छपः | 22 |
| दशमः पाठः | सूक्तयः | 25 |
| एकादशः पाठः | सद्-व्यवहारः | 27 |
| द्वादशः पाठः | विभिन्नाः संग्रहाः | 30 |
| त्रयोदशः पाठः | दीपमाला | 33 |
| चतुर्दशः पाठः | भगतसिंहः | 36 |
| पञ्चदशः पाठः | सुभाषितानि | 40 |
| षोडशः पाठः | बालकः ध्रुवः | 42 |
| सप्तदशः पाठः | अस्माकं प्रदेशः | 45 |
| अष्टादशः पाठः | लाला लाजपतरायः | 48 |
| नवदशः पाठः | आनन्दपुरस्य महत्त्वम् | 52 |
| विंशः पाठः | श्रद्धायाः चमत्कारः | 55 |
| एकविंशः पाठः | कालिदासः | 58 |
| द्वाविंशः पाठः | रक्तदुर्गम् | 61 |
| त्रयोविंशः पाठः | वीरः अभिमन्युः | 64 |
| चतुर्विंशः पाठः | विज्ञानस्य चमत्कारः | 67 |
| पञ्चविंशः पाठः | देश-रक्षकाः | 70 |
| षड्विंशः पाठः | दूर-दर्शनम् | 73 |
| **व्याकरण-भागः** | | 76 |
| **शब्दकोशः** | | 109 |

प्रथमः पाठः

# ईश-वन्दना



प्रभो ! भवदीय महिमायं
  कथम् अज्ञेन ज्ञातव्यः !
    कृपा-कवचं विना विजयः
      कथम् अबलेन प्राप्तव्यः !

त्वदीया उच्चता गगनं
  अधः कर्तुं समर्था चेत्,
    कथं तव भव्य-वेशोऽयं
      मया खर्वेण ध्यातव्यः !

निरवलम्बः तवाधीनः,
  पिता माता सखा त्वं मे।
    तृषित सारङ्ग-बालाय
      दयाबिन्दुः प्रदातव्यः।

न यावद् वरद-हस्तस्ते
अनाथं शावकं रक्षेत्
कथं तावत्सुधासार:
सुलघु-हंसेन पातव्य: !

**शब्दार्था:**

| | |
|---|---|
| अध: कर्तुम् = नीचा करने के लिए | भव्यवेश: = शानदार ठाठ, उत्तम स्वरूप |
| खर्वेण = छोटे, बौने द्वारा | ध्यातव्य: = ध्यान करने योग्य |
| निरवलम्ब: = बेसहारा | सारङ्ग = चातक |
| शावकम् = बच्चे को | सुधासार: = अमृत तत्त्व (ज्ञान) |

**अभ्यास**

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) विजय प्राप्त करने के लिए भगवान् की कृपा किसका रूप धारण करती है ?

(ख) ईश्वर की ऊँचाई किसे नीचा बनाने में समर्थ है ?

(ग) प्रार्थना में कवि ने चातक का बच्चा किसे माना है ? वह ईश्वर से क्या चाहता है ?

(घ) सुधा-सार से क्या तात्पर्य है ?

(ङ) सुलघु हंस का क्या भाव है ?

**प्रश्न 2. इस प्रार्थना को हिन्दी भाषा में अपने शब्दों में लिखो।**

**प्रश्न 3. प्रार्थना को कण्ठस्थ करो।**

**प्रश्न 4. सन्धिविच्छेद करो—**

महिमायम्, निरवलम्ब:, तवाधीन:, वेशोऽयम् ।

*****

## द्वितीयः पाठः

# परिचयः

**( प्रातः काले विद्यालयस्य प्रांगणे सुरेशः महेशः च आगच्छतः )**

अध्यापकः - भोः । किं तव नाम ?

सुरेशः - श्रीमन् , अहं सुरेशः ।

अध्यापकः - किं तव पितुः नाम ?

सुरेशः - मम पितुः नाम श्री रामनाथः ।

अध्यापकः - साधु, सः किं कार्यं करोति ?

सुरेशः - सः महाविद्यालये संस्कृत-विषयं अध्यापयति ।

अध्यापकः - सुष्ठु, किं तव मातुः नाम ?

सुरेशः - श्रीमन्, मम माता श्रीमती रमा अस्ति ।

अध्यापकः - सा गृहे एव तिष्ठति कार्याय वा अन्यत्र गच्छति ?

सुरेशः - सा अपि अध्यापन-कार्यं करोति।

अध्यापकः - सा कुत्र अध्यापयति ?

सुरेशः - सा सरकारी विद्यालये पाठयति ।

अध्यापकः - शोभनम्, कोऽयं त्वया सह ? कस्यां कक्षायां च पठति ?

सुरेशः - अयं महेशः, मम अनुजः । एषः सप्तम् कक्षायां पठति ।

अध्यापकः - महेश ! त्वं कुत्र पठसि ?

महेशः - श्रीमन्, अहं दयानन्द-विद्यालये पठामि ।

अध्यापकः - एषः विद्यालयः कुत्र अस्ति ?

महेशः - एषः विद्यालयः आवयोः गृहस्य समीपम् एव अस्ति ।

अध्यापकः - कुत्र तव गृहम् ?

महेशः - आवयोः गृहं नगरात् बहिः अस्ति । एतत् सरकारी महाविद्यालयस्य समीपम् अस्ति।

अध्यापकः - युवाम् अत्र किमर्थम् आगच्छथः ?

सुरेशः - श्रीमन्, आवाम् अस्मिन् विद्यालये पठितुम् इच्छावः ?

अध्यापकः - शोभनम् तदा युवां शीघ्रं मुख्य-अध्यापक-महोदयस्य कक्षे गच्छतम्। तस्य आज्ञया एव विद्यालये प्रवेशः भविष्यति ।

सुरेशः - धन्यवादः, महाभागाः। आवां गच्छावः ।

## शब्दार्थाः

महाविद्यालये = कालेज में

सुष्ठु = ठीक (अच्छा)

साधु = अच्छा

शोभनम् = अच्छा

मम = मेरी

अस्मिन् = इस में

प्रवेशः = दाखिला

अनुजः = छोटा भाई

महाभागाः = आदरणीय

अध्यापयति = पढ़ाता है।

नगरात् = नगर से

बहिः = बाहर

कस्यां कक्षायाम् = किस कक्षा में

पाठयति = पढ़ाती है।

अपि = भी

तव = तुम्हारी

इच्छावः = चाहते हैं

कक्षे = कमरे में

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) सुरेश के माता-पिता क्या काम करते हैं ?

(ख) महेश कौन से स्कूल में पढ़ता है ?

(ग) सुरेश और महेश स्कूल में किस लिए गये ?

(घ) अध्यापक ने सुरेश और महेश को क्या कहा ?

(ङ) स्कूल में प्रवेश किस की आज्ञा से मिलता है ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो –**

रमा, महेशः, सुरेशः, रामनाथः

(क) श्रीमन्, अहं ................. ।

(ख) मम पितुः नाम श्री ................... ।

(ग) मम मातुः नाम श्रीमती ................ ।

(घ) अयं ................ मम अनुजः ।

**प्रश्न 3. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो —**

(क) स: किं कार्यं करोति ? (मध्यम पु॰ एक व॰)

(ख) अहं दयानन्द-विद्यालये पठामि । (प्रथम पु॰ एक व॰)

(ग) युवाम् अत्र किमर्थम् आगच्छथ: ? (उत्तम पु॰ एक व॰)

(घ) आवां अस्मिन् विद्यालये पठितुम् इच्छाव: ।(मध्यम पु॰ बहु व॰)

**प्रश्न 4. निम्नलिखित तालिका में दिये गए शब्दों से सार्थक वाक्य बनाओ —**

| | | |
|---|---|---|
| (क) | स: महाविद्यालये | कार्यालय वा अन्यत्र गच्छति। |
| (ख) | सा गृहे एव तिष्ठति | पठामि । |
| (ग) | अहं दयानन्द-विद्यालये | इच्छाव: । |
| (घ) | आवां अस्मिन् विद्यालये पठितुम् | अध्यापयति । |

**प्रश्न 5. संस्कृत में अनुवाद करो —**

(क) तुम कहाँ जाते हो ?

(ख) तुम्हारे साथ यह कौन है ?

(ग) तुम कहाँ पढ़ते हो ?

(घ) तुम्हारी माता का नाम क्या है ?

*****

तृतीयः पाठः

# अस्माकं पुस्तकालयः



अयम् अस्माकं विद्यालयस्य पुस्तकालयः अस्ति। अस्मिन् दश-पुस्तकाधाराः सन्ति। एषु बहूनां विषयाणां पुस्तकानि सन्ति। वयम् अर्धावकाशे तत्र गच्छामः, समाचार-पत्राणि च पठामः। पुस्तकालयस्य भित्तिषु विविधानि चित्राणि सन्ति। तत्र शिक्षाप्रदाः सूक्तयः अपि लिखिताः सन्ति।

पुस्तकालयस्य एकस्मिन् भागे वाचनालयः अस्ति। यत्र विशालं काष्ठफलकम् अस्ति, तत् परितः वेत्रासनानि सन्ति। अध्यापकाः छात्राः च अत्र

आगत्य पुस्तकानि समाचार-पत्राणि च पठन्ति। अत्र सर्वे तूष्णीं भूत्वा तिष्ठन्ति।

विभिन्न-कक्षाणां छात्राः अत्र आगच्छन्ति । ते स्वेच्छया पुस्तकानां चयनं कुर्वन्ति। पुस्तकालयस्य अध्यक्षः छात्रेभ्य; पुस्तकानि यच्छति । छात्राः तानि पुस्तकानि स्वगृहेषु नीत्वा पठन्ति, ज्ञान-वृद्धिं च कुर्वन्ति । अस्माकं विद्यालये एकः पुस्तक-कोषः अपि अस्ति । निर्धनाः छात्राः तस्मात् पुस्तकानि नयन्ति वर्षान्ते च तानि निवर्तयन्ति । यतः पुस्तकानि पुस्तकालयस्य सम्पत्तिः एव।

### शब्दार्थाः

| | |
|---|---|
| पुस्तकाधाराः = अलमारियाँ | भित्तिषु = दीवारों पर |
| अर्धावकाशे = आधी छुट्टी में | शिक्षाप्रदाः = शिक्षादायक |
| पुस्तकालय-अध्यक्षः = लाइब्रेरियन | काष्ठ-फलकम् = मेज़ |
| वाचनालयः = पढ़ने का कमरा | वेत्रासनानि = कुर्सियाँ |
| आगत्य = आकर ( आ + गम् + ल्यप् ) | तूष्णीम् = चुपचाप |
| निवर्तयन्ति = ( नि + √ वृत्, लट् , प्र० पु०, बहु० व० ) लौटा देते हैं | तिष्ठन्ति = बैठते हैं |
| | नयन्ति = ले जाते हैं । |

### अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) पुस्तकालय में कितनी अलमारियाँ हैं ?

(ख) पुस्तकालय की दीवारों पर क्या लिखा हुआ है ?

(ग) वाचनालय के क्या लाभ हैं ?

(घ) पुस्तक-कोष से हमें क्या लाभ हैं ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो —**

पुस्तकाधाराः, वाचनालयः, विद्यालयस्य, काष्ठफलकम् ।

(क) अयम् अस्माकं .............. पुस्तकालयः अस्ति।

(ख) अस्मिन् दश- .............. सन्ति।

(ग) पुस्तकालयस्य एकस्मिन् भागे .............. अस्ति।

(घ) यत्र विशालं ................ अस्ति ।

**प्रश्न 3. निम्नलिखित तालिका में दिये गए पदों से सार्थक वाक्य बनाओ**

| | | |
|---|---|---|
| (क) | काष्ठ-फलकं परित: | भूत्वा तिष्ठन्ति |
| (ख) | अस्मिन् दश- | छात्रेभ्य: यच्छति |
| (ग) | अध्यक्ष: तानि पुस्तकानि | शिक्षाप्रदा: सूक्तय: अपि लिखिता: सन्ति |
| (घ) | पुस्तकालयस्य भित्तिषु | वेत्रासनानि सन्ति |
| (ङ) | सर्वे तूष्णीम् | पुस्तकाधारा: सन्ति |

**प्रश्न 4. रेखांकित शब्दों में यथा-निर्दिष्ट परिवर्तन करो—**

(क) पुस्तकालये वाचनालय: अस्ति । (बहुवचन में)

(ख) पुस्तकालये पुस्तकाधारा: सन्ति । (एकवचन में)

(ग) सूक्तय: लिखिता: सन्ति । (एकवचन में)

(घ) पुस्तककोष: निर्धनेभ्य: छात्रेभ्य: अतीव लाभप्रद: अस्ति। (एकवचन में)

**प्रश्न 5. संस्कृत में अनुवाद करो—**

(क) मेज़ के चारों ओर कुर्सियाँ हैं ।

(ख) आधी छुट्टी में हम पुस्तकालय में जाते हैं ।

(ग) पुस्तकों से ज्ञान-वृद्धि होती है।

(घ) पुस्तकालय निर्धन छात्रों के लिए लाभकारी है ।

(ङ) पुस्तकालय में सब चुपचाप बैठते हैं ।

*****

## चतुर्थः पाठः

# सूक्तयः

1. सत्यं शिवं सुन्दरम् ।
2. गुणाः सर्वत्र पूज्यन्ते ।
3. कुपुत्रेण कुलं नष्टम् ।
4. अतिदर्पे हता लंका ।
5. अजीर्णे भोजनं विषम् ।
6. विनाशकाले विपरीत बुद्धिः ।
7. हितं मनोहारि च दुर्लभं वचः ।
8. उद्यमेन हि सिध्यन्ति कार्याणि ।
9. बुद्धिः यस्य बलं तस्य ।
10. सेवाधर्मः परम-गहनः ।
11. शीलं परं भूषणम् ।
12. गतः कालो न चायाति।
13. अति सर्वत्र वर्जयेत् ।
14. विद्वान् सर्वत्र पूज्यते ।
15. विद्या विहीनः पशुः ।
16. वचने का दरिद्रता ?

### शब्दार्थाः

शिवं = कल्याणकारी
हता = नष्ट हुई
हितं = हितकारी
उद्यमेन = परिश्रम से
विहीनः = बिना
वर्जयेत् = त्याग दे

अति दर्पे = अधिक अहंकार करने पर
अजीर्णे = भूख न होने पर
वचः = कथन
भूषणम् = गहना
वचने = बोलने में
दरिद्रता = कंजूसी (गरीबी)

कुलं = वंश कुपुत्रेण = बुरे पुत्र से
दुर्लभं = कठिनाई से प्राप्त होने वाला शीलं = सदाचार
विषम् = ज़हर

**अभ्यास**

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) मनुष्य की विनाश के समय बुद्धि कैसी होती है ?

(ख) कैसा कथन दुर्लभ है ?

(ग) किसकी पूजा सब जगह होती है ?

(घ) मनुष्य के कार्य कैसे सिद्ध होते हैं ?

(ङ) किसके बिना मनुष्य पशु के समान होता है ?

**प्रश्न 2. किन्हीं दस सूक्तियों को कण्ठस्थ करो और उन्हें अर्थ सहित लिखो—**

**प्रश्न 3. रिक्त स्थानों की पूर्ति करो ।**

(क) गुणाः सर्वत्र ............... ।

(ख) बुद्धिः यस्य ................ ।

(ग) गतः कालो .................. ।

(घ) विद्या विहीनः ............... ।

**प्रश्न 4. निम्नलिखित भावों से सम्बन्धित सूक्तियां लिखो —**

(क) सत्य ही शिव है और शिव ही सुन्दर है।

(ख) बीता हुआ समय लौट कर नहीं आता ।

(ग) बुरे पुत्र से कुल का नाश होता है ।

(घ) विद्वान् की सब जगह पूजा होती है ।

(ङ) विनाश के समय बुद्धि विपरीत होती है।

**प्रश्न 5. संस्कृत में अनुवाद करो —**

(क) परिश्रम से कार्य सिद्ध होते हैं ।

(ख) सेवा धर्म बहुत कठिन है ।

(ग) शील श्रेष्ठ आभूषण है ।

(घ) विद्या के बिना मनुष्य पशु है ।

## पंचमः पाठः

# सिद्धार्थः

कपिलवस्तु-नगरे शुद्धोदनो नामको राजा आसीत् । तस्य पुत्रः सिद्धार्थः बाल्यात् एव अहिंसायाः धर्मस्य च पालकः आसीत् । सः जनानां दुखानां हर्ता, शान्तेः च स्थापकः आसीत् ।

एकदा बालः सिद्धार्थः प्रातः भ्रमणाय उपवनम् अगच्छत् । उपवने बहवः खगाः मधुरं कूजन्ति स्म। सिद्धार्थः पक्षिणः अपश्यत् । तेषाम् कलरवं श्रुत्वा अतुष्यत् । किंचित् कालानन्तरं तस्य भ्राता देवदत्तः अपि उपवनम् आगच्छत्। सः शरेण आकाशे एकं हंसम् अविध्यत्। शरेण विद्धः हंसः भूमौ अपतत् । सिद्धार्थः करुणया तं हंसं कुटीरम् आनयत् । तत्र हंसस्य परिचर्याम् अकरोत् । देवदत्तः स्वशरेण विद्धं हंसं ग्रहीतुं तत्र आगच्छत् । सिद्धार्थः देवदत्तम् अवदत् — ''त्वम् अस्य हंसस्य घातकः, किन्तु अहं तु अस्य रक्षकः । अतः अयं मम हंसः ।''

अथ सिद्धार्थस्य देवदत्तस्य च मध्ये विवादः अभवत् । देवदत्तः नृपस्य समीपम् अगच्छत् । सिद्धार्थः अपि तेन सह तत्र अगच्छत् । देवदत्तः नृपं सर्व वृत्तान्तम् अकथयत्। सिद्धार्थः अपि स्वं पक्षम् अवदत् । नृपः वृतान्तं श्रुत्वा निर्णयम् अकरोत्— ''अयं हंसः तु सिद्धार्थस्य एव, यतः स अस्य रक्षकः ।'' उक्तं हि ''रक्षकः भक्षकात् श्रेष्ठः । अतएव सिद्धार्थस्य एव एषः हंसः अस्ति।'' नृपस्य निर्णयेन सिद्धार्थः अतीव प्रसन्नः अभवत् ।

### शब्दार्थाः

एकदा = एक बार
भ्रमणाय = घूमने के लिए
उपवनम् = बाग़
बहवः = बहुत सारे
कूजयन्ति = चहचहाना
कलरवं = मीठी आवाज़
शरेण = तीर से
विद्धः = घायल किया हुआ
परिचर्याम् = मरहम-पट्टी
घातकः = मारने वाला

रक्षकः = रक्षा करने वाला
भक्षकात् = खाने वाले से
वृत्तान्तम् = बात (समाचार)
अयम् = यह
अविध्यत् = घायल कर दिया (बेंधना)
अतुष्यत् = प्रसन्न हुआ
कालान्तरं = समय के पश्चात्
कुटीरम् = कुटिया

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) हंस को किसने घायल किया ?

(ख) सिद्धार्थ ने हंस की किस प्रकार रक्षा की ?

(ग) सिद्धार्थ ने देवदत्त को क्या कहा ?

(घ) राजा ने इस विवाद को सुनकर क्या निर्णय किया ?

**प्रश्न 2. रेखांकित शब्दों में यथार्निदिष्ट परिवर्तन करो—**

(क) उपवने खगाः मधुरं कुजन्ति स्म। (प्र॰ पु॰ एक व॰)

(ख) सः जनानां दुखानां हर्ता, शान्तेः च स्थापकः आसीत् (उ॰ पु॰ एक व॰)

(ग) सः शरेण आकाशे एकं हंसम् अविध्यत् (म॰ पु॰ एक व॰)

(घ) त्वम् अस्य हंसस्य घातकः (उ॰ पु॰ एक व॰)

**प्रश्न 3. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो —**

देवदत्तस्य, देवदत्तः, सिद्धार्थः, शुद्धोदनो

(क) कपिल वस्तु-नगरे ............नामको राजा आसीत् ।

(ख) ................ स्वशरेण विद्धं हंसं ग्रहीतुं तत्र आगच्छत् ।

(ग) सिद्धार्थस्य ............. च मध्ये विवादः अभवत् ।

(घ) ............. करुणया तं हंसं कुटीरं आनयत् ।

**प्रश्न 4. निम्नलिखित तालिका के शब्दों से सार्थक वाक्य बनाओ –**

| | |
|---|---|
| (क) एकदा बाल: सिद्धार्थ: | समीपम् अगच्छत् । |
| (ख) देवदत्त: नृपस्य | रक्षक: भक्षकात् श्रेष्ठ: । |
| (ग) सिद्धार्थ: करुणया तं हंसं | प्रात: भ्रमणाय उपवनम् अगच्छत् । |
| (घ) उक्तं हि | कुटीरम् आनयत् । |

**प्रश्न 5. संस्कृत में अनुवाद करो—**

(क) सिद्धार्थ बाग़ में गया।

(ख) पक्षी चहचहाते हैं।

(ग) मैं इसका रक्षक हूँ।

(घ) मैं हंस की सेवा करता हूँ।

*****

षष्ठः पाठः

# समाचारपत्रम्




समाचारपत्रं संसारस्य दैनिक-घटनानां दर्पणम् अस्ति। अद्यत्वे समाचार-पत्रस्य अस्माकं जीवने महत्त्वपूर्णं स्थानम् अस्ति ।

समाचार-पत्रस्य क्षेत्रं विस्तृतम् अस्ति । शिक्षा-विज्ञान-राजनीति-सम्बन्धिताः समाचाराः अस्य विषयाः भवन्ति। क्रीडाजगतः समाचाराः परीक्षा-परिणामः, पण्य-पदार्थानां मूल्यानि, आजीविका-विज्ञापनानि च समाचार-पत्रस्य मुख्याः विषयाः सन्ति ।

समाचार-पत्रस्य मुद्रणं कठिनं कार्यम् अस्ति। देशस्य विभिन्न-भागेषु समाचार-पत्राणां सम्वाददातारः भवन्ति। ते समाचाराणां संकलनं कुर्वन्ति । स्व-स्व मुख्यकार्यालये तान् समाचारान् दूरभाषणयन्त्रैः, विद्युत्संदेशैः दूरमुद्रण-यन्त्रैः च प्रेषयन्ति । तत्र सम्पादकाः तेषां समाचाराणां संग्रहणं कुर्वन्ति । मुद्रण-यन्त्रेण

समाचाराणां मुद्रणं भवति। तदा विक्रेतारः समाचार-पत्राणां विक्रयं कुर्वन्ति । तेषां विक्रयेण अनेके जनाः आजीविकायै धन-संग्रहं कुर्वन्ति ।

अस्मिन् प्रजा-तन्त्र-युगे समाचारपत्रस्य अतीव महत्त्वम् अस्ति । इदं प्रजा-वर्गस्य शासक-वर्गस्य च मध्ये शृंखला अस्ति ।

## शब्दार्थाः

दर्पणम् = शीशा

अद्यत्वे = आजकल

विस्तृतम् = विशाल

पण्य-पदार्थानाम् = बाज़ारी वस्तुओं के

आजीविका विज्ञापनानि = रोज़गार की सूचनाएं

मुद्रणम् = छपाई

समाहरन्ति = एकत्र करते हैं

प्रेषयन्ति = भेजते हैं

मुद्रण-यन्त्रेण = छापने की मशीन से

विक्रेतारः = बेचने वाले

विक्रयेण = बिक्री से

शृंखला = कड़ी

दूरभाषणयन्त्रैः = **टेलीफ़ोनों से**

विद्युत्सन्देशैः = टेलीग्रामों से

दूरमुद्रण-यन्त्रैः = **टेलीप्रिंटरों से**

सम्पादकाः = सम्पादन करने वाले

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) समाचार पत्र के लाभ बताओ।

**(ख) समाचार पत्र के मुख्य विषय क्या-क्या होते हैं ?**

(ग) विभिन्न स्थानों से समाचार कैसे भेजे जाते हैं ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो ।**

विक्रेतारः, सम्पादकाः, समाचार-पत्रस्य, सम्वाददातारः

(क) अद्यत्वे .................. अस्माकं जीवने महत्त्वपूर्णं स्थानम् अस्ति।

(ख) देशस्य विभिन्न-भागेषु समाचार-पत्राणां .............. भवन्ति।

(ग) तत्र ........... तेषां समाचाराणां संग्रहणं कुर्वन्ति ।

(घ) ............. समाचार-पत्राणां विक्रयं कुर्वन्ति ।

**प्रश्न 3. निम्नलिखित तालिका में दिय गए पदों से सार्थक वाक्य बनाओ —**

| | | |
|---|---|---|
| (क) | समाचारपत्रं संसारस्य | अस्य विषयाः भवन्ति । |
| (ख) | शिक्षा, विज्ञान, राजनीति-सम्बन्धिताः समाचाराः | दैनिक-घटनानां दर्पणम् अस्ति । |
| (ग) | समाचारपत्रस्य मुद्रणं | मध्ये शृंखला अस्ति । |
| (घ) | इदं प्रजा-वर्गस्य शासक वर्गस्य | कठिनं कार्यम् अस्ति । |

**प्रश्न 4. संस्कृत में अनुवाद करो —**

(क) मैं प्रतिदिन समाचार पत्र पढ़ता हूँ।

(ख) उसका पिता समाचार पत्र का सम्पादक है।

(ग) वह समाचार पत्र बेचता है।

(घ) इस युग में समाचारपत्र का बहुत महत्त्व है ।

(ङ) तू समाचार इकट्ठे कर।

*****

सप्तमः पाठः

# श्री गुरुः गोबिन्दसिंहः



श्री गुरुः गोबिन्दसिंहः सिक्खानां दशमः गुरुः आसीत् । तस्य जन्म १६६६ तमे ईसवीय वत्सरे पटना-नगरे अभवत् । तस्य जनकः नवमः गुरुः श्री तेग़बहादुरः माता च गुजरी आसीत् ।

गुरुः गोबिन्दसिंहः वीर-पुरुषः आसीत् । सः बाल्यात् एव निर्भीकः साहसिकः च आसीत् । सः कुशलः धनुर्धरः अश्वारोहः च आसीत् ।

श्री गुरु-गोबिन्दसिंहेन बाल्यात् एव हिन्दूधर्मस्य रक्षणार्थं दृढव्रतं धारितम् ।

यदा सः नववर्षीयः आसीत्, तदा सः स्वपितरं धर्मस्य रक्षायै स्वजीवनं समर्पयितुं प्रैरयत्। फलतः गुरुः तेग़बहादुरः दिल्ली-नगरं गत्वा आत्म-बलिदानम् अकरोत्। अधुना तस्य बलिदानस्थाने शीशगञ्जः गुरुद्वारः अस्ति ।

बलिदानं विना धर्मस्य रक्षा न सम्भवति इति अस्य महापुरुषस्य दृढनिश्चयः आसीत् । अतः सः धर्मरक्षणार्थं 1699 तमे ईसवीय वत्सरे आनन्दपुर-नगरे वैशाखी-दिवसे खालसा-पन्थस्य स्थापनाम् अकरोत् । सः जनेषु नवजीवनस्य सञ्चारम् अकरोत् ।

तस्य चत्वारः पुत्राः आसन् । तैः धर्मरक्षायै निज-जीवनस्य बलिः दत्ता। तैः प्रेरिताः असंख्याः जनाः नृशंस-मुग़ल-साम्राज्यस्य विरोधं अकुर्वन्, स्वप्राणान् च अत्यजन् ।

गुरुः गोबिन्दसिंहः संस्कृत-भाषायाः फारसी-भाषायाः च महान् विद्वान् आसीत्। तस्य कृतयः वीर-रसपूर्णाः सन्ति। तस्य काश्चित् रचनाः दशमग्रन्थे संगृहीताः सन्ति। तासु 'विचित्रनाटकम्', 'अकालस्तुतिः', 'चण्डीचरित्रं' च मुख्याः सन्ति।

निज जीवनस्य अन्तिमसमये सः धर्मप्रचाराय देशस्य पर्यटनम् अकरोत् । अन्ततः सः महाराष्ट्र-प्रदेशे नन्देड ग्रामम् अगच्छत्। तत्र सः १७०८ तमे ईसवीये वत्सरे सुरलोकं गतः। धन्यः सः महान् गुरुः ।

**शब्दार्थाः**

जनकः = पिता
बाल्यात् = बचपन से
निर्भीकः = निडर
साहसिकः = साहसी
धनुर्धरः = धनुष धारण करने वाला
अश्वारोहः = घुड़सवार
रक्षणार्थम् = रक्षा के लिए
समर्पयितुम् = (सम् + अर्प + तुमुन्) समर्पण करने के लिए
प्रैरयत् = प्रेरणा दी
फलतः = परिणाम स्वरूप
गत्वा = (√गम् + क्त्वा) जाकर
कृतयः = रचनाएं, कृतियां
संगृहीताः = इकट्ठी की हुई
पर्यटनम् = यात्रा, सैर
सुरलोकम् = स्वर्ग को

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) श्री गुरु गोबिन्द सिंह जी का जन्म कब और कहाँ हुआ?

(ख) श्री गुरु गोबिन्द सिंह जी के पिता कौन थे ?

(ग) श्री गुरु तेगबहादुर ने अपने जीवन का बलिदान क्यों किया ?

(घ) श्री गुरु गोबिन्द सिंह ने खालसा पन्थ की स्थापना कब और कहाँ की ?

(ङ) गुरु जी की मुख्य रचनाओं के नाम लिखो।

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो—**

आनन्दपुर , तेगबहादुरः, गोबिन्द सिंहः

(क) श्री गुरुः ................. सिक्खानां दशमः गुरुः आसीत् ।

(ख) श्री गुरुः .............दिल्ली-नगरं गत्वा आत्म-बलिदानम् अकरोत्।

(ग) ......... नगरे वैशाखी-दिवसे खालसा-पन्थस्य स्थापनाम् अकरोत्।

**प्रश्न 3. निम्न तालिका में दिए गए पदों से सार्थक वाक्य बनाओ—**

| | |
|---|---|
| तस्य जनकः नवमः गुरुः श्रीतेगबहादुरः | महान् विद्वान् आसीत् । |
| तस्य जन्म १६६६ तमे ईस्वीय वत्सरे | शीशगञ्जः गुरुद्वारः अस्ति। |
| गुरुः गोबिन्द सिंहः संस्कृत भाषायाः फारसी भाषायाः च | माता च गुजरी आसीत् । |
| अधुना तस्य बलिदान-स्थाने | पटना-नगरे अभवत् । |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) श्री गुरु गोबिन्द सिंह जी का जन्म पटना में हुआ ।

(ख) उन्होंने धर्म की रक्षा की ।

(ग) श्री गुरु गोबिन्द सिंह जी के चार वीर पुत्र थे ।

(घ) हमें धर्म की रक्षा करनी चाहिए।

(ङ) श्री गुरु तेग़बहादुर ने अपने जीवन का बलिदान किया।

*****

### अष्टमः पाठः

# सुभाषितानि

अलसस्य कुतो विद्या ? अविद्यस्य कुतो धनम् ?
अधनस्य कुतो मित्रम् ? अमित्रस्य कुतः सुखम् ? ॥१॥

प्रथमे नाऽर्जिता विद्या, द्वितीये नाऽर्जितं धनम् ।
तृतीये नाऽर्जितं पुण्यं, चतुर्थे किं करिष्यति ॥२॥

नमन्ति सफलाः वृक्षाः, नमन्ति सगुणाः जनाः ।
शुष्क-वृक्षाः च मूर्खाः च, न नमन्ति कदाचन ॥३॥

संपदि यस्य न हर्षो विपदि विषादो, रणे च भीरुत्वम् ।
तं भुवनत्रय-तिलकं जनयति जननी सुतं विरलम् ॥४॥

पुस्तकस्था तु या विद्या, पर-हस्त-गतं धनम् ।
कार्य-काले समुत्पन्ने न सा विद्या, न तद् धनम् ॥५॥

सः जीवति गुणाः यस्य, यस्य धर्मः सः जीवति ।
गुण-धर्म विहीनस्य जीवितं निष्प्रयोजनम् ॥६॥

जीविते यस्य जीवन्ति विप्राः मित्राणि बान्धवाः ।
सफलं जीवितं तस्य आत्मर्थे को न जीवति ॥७॥

पयः पानं भुजंगानां केवलं विषवर्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥८॥

मक्षिका व्रणमिच्छन्ति, धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति, शान्तिमिच्छन्ति सज्जनाः ॥९॥

खलः सर्षप-मात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वः मात्राणि पश्यन्नपि न पश्यति ॥१०॥

## शब्दार्थाः

अर्जिता = कमाई, प्राप्त की
विवादाय = झगड़ने के लिए
विप्राः = ब्राह्मण
जीवितं = जीना
आत्मर्थे = अपने लिए
पयःपानम् = दूध पिलाना
प्रकोपाय = गुस्से के लिए
पार्थिवाः = राजा लोग
संपदि = धन आने पर
जनयति = जन्म देती है।
खलस्य = दुष्ट का
सर्षपः = सरसों
बिल्वः = बिल्व का फल
कदाचन = कभी
विषादः = दुःख

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) मनुष्य को जीवन के पहले, दूसरे और तीसरे भाग में क्या-क्या करना चाहिए ?

(ख) किस मनुष्य का जीवन सफल माना जाता है ?

(ग) मूर्खों को उपदेश देने से क्या होता है ?

**प्रश्न 2. किन्हीं पाँच सुभाषितों को कण्ठस्थ करो—**

**प्रश्न 3. वाक्यों को पूरा करो —**

(क) शुष्क-वृक्षाः च मूर्खाः च, ................ ।

(ख) प्रथमे नाऽर्जिता विद्या, ............. ।

(ग) पुस्तकस्था तु या विद्या, ............... ।

(घ) पयः पानं भुजंगानां केवलं .............. ।

(ङ) जीविते यस्य जीवन्ति .................. ।

**प्रश्न 4. संस्कृत में अनुवाद करो —**

(क) फलयुक्त वृक्ष झुकते हैं ।

(ख) सज्जन शान्ति चाहते हैं।

(ग) निर्धन का मित्र कौन होता है ?

(घ) मित्र के बिना सुख कहाँ ?

नवमः पाठः

# दुर्बुद्धिः कच्छपः



कस्मिंश्चित् जलाशये कम्बुग्रीवो नाम कच्छपः प्रतिवसति स्म । द्वौ हंसौ तस्य सुहृदौ आस्ताम् । तौ अपि जलाशयस्य तीरे अवसताम् । सः ताभ्यां सह वार्तालापं करोति स्म। एवं तेषां कालः सुखेन अगच्छत्।

कदाचित् वृष्टेः अभावात् जलाशयः अशुष्यत्। तदा हंसौ अवदताम् ''मित्र! साम्प्रतं जलाशये कर्दमः एव अस्ति। तव वासोऽत्र कथं भविष्यति। तव दुःखेन आवां दुःखितौ स्वः।'' कम्बुग्रीवोऽवदत्— ''भो मित्रे ! युवां सत्यं वदथः।

जलस्य अभावात् साम्प्रतं मम जीवनं न भविष्यति । तथापि उपाय: कर्त्तव्य: । जीवनस्य एक: उपायो अस्ति।''

तौ अवदताम् —''शीघ्रं वद । आवां तम् उपायम् करिष्याव:।'' कम्बुग्रीव: अवदत्— ''एकस्य लघुन: काष्ठस्य अन्वेषणं कर्त्तव्यम् । मया दन्तै: मध्यप्रदेशे तस्य ग्रहणं कर्त्तव्यम् । युवां तत् काष्ठं मया सहितं कोटिभागयो: संगृह्य अन्यस्मिन् जलाशये नेष्यथ: ।''

तौ अवदताम् — ''मित्र ! सर्वम् एवं भविष्यति । परन्तु गमनकाले त्वया मौनं धारयितव्यम् । अन्यथा त्वम् पतिष्यसि।'' ते तथा अकुर्वन्। आकाशमार्गेण गच्छत: तान् दृष्ट्वा जना: अवदन् —''पश्यत ! पश्यत ! हंसौ किं नयत: ।'' जनानां कोलाहलं श्रुत्वा कम्बुग्रीव: अकथयत् —''भो मित्रे ! किमर्थम् एष: कोलाहल: ?'' कथनकाले एव कच्छप: अध: अपतत् । जना: तस्य वधम् अकुर्वन् ।

अत: एव पण्डिता: कथयन्ति—

''सुहृदां हितकामानां न करोतीह यो वच: ।
स: कूर्म इव दुर्बुद्धि:, काष्ठाद् भ्रष्टो विनश्यति ।''

## शब्दार्था:

शुष् = सूखना
संगृह्य (सम् + ग्रह + ल्यप्) = पकड़ करके
कोलाहल: = शोर
कर्दम: = कीचड़
वृष्टि: = बारिश
कोटिभाग: = सिरा
सुहृद् = मित्र
कच्छप: = कछुआ
जलाशय: = तालाब
वचस् = वचन
लघु = छोटा
काष्ठम् = काठ, लकड़ी
अन्वेषणम् = खोज
मौनम् = चुप
हितकाम: = हित चाहने वाला
भ्रष्ट: = गिरा हुआ
नेष्यथ: = तुम दोनों ले जाना

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) जलाशय में कौन रहता था ?

(ख) हंस और कछुआ एक स्थान से दूसरे स्थान पर क्यों जाना चाहते थे?

(ग) लोगों के कोलाहल को सुनकर कछुए ने क्या कहा ?

(घ) हंसों ने कछुए को रास्ते में क्या करने के लिए कहा ?

(ङ) मित्रों की बात न मानने पर क्या होता है ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो —**

हंसौ, जलाशयस्य, आकाश-, कम्बुग्रीवः ।

(क) जलाशये .............नाम कच्छपः प्रतिवसति स्म ।

(ख) द्वौ ........... तस्य सुहृदौ आस्ताम् ।

(ग) तौ अपि ............. तीरे अवसताम् ।

(घ) ............ मार्गेण गच्छतः तान् दृष्ट्वा जनाः अवदन् ।

**प्रश्न 3. निम्नलिखित तालिका में दिए गए पदों से सार्थक वाक्य बनाओ —**

| | | |
|---|---|---|
| (क) | मित्र ! साम्प्रतं जलाशये | अधः अपतत् । |
| (ख) | एकस्य लघुनः | हंसौ किं नयतः । |
| (ग) | जनाः अवदन् पश्यत ! पश्यत ! | काष्ठस्य अन्वेषणं कर्त्तव्यम् । |
| (घ) | कथनकाले एव कच्छपः | कर्दमः एव विद्यते । |

**प्रश्न 4. संस्कृत में अनुवाद करो —**

(क) जलाशय में कछुआ रहता था।

(ख) तुम दोनों सत्य बोलते हो।

(ग) मैं मौन धारण करता हूँ।

(घ) तू मेरा मित्र है।

(ङ) मैं चुप रहूँगा।

*****

## दशमः पाठः

# सूक्तयः

1. मतिरेव बलाद् गरीयसी।
2. सत्सङ्गतिः कथय किं न करोति पुंसाम् ?
3. अभ्यासेन सर्वं सिध्यति ।
4. अति सर्वत्र वर्जयेत् ।
5. उदारचरितानां तु वसुधैव कुटुम्बकम् ।
6. मनस्वी कार्यार्थी गणयति न दुःखम् न च सुखम् ।
7. तृष्णा न जीर्णा वयमेव जीर्णाः ।
8. वाग्भूषणं भूषणम् ।
9. सुपुत्रः कुलदीपकः ।
10. परोपकाराय सतां विभूतयः ।
11. विद्याधनं सर्वधनप्रधानम् ।
12. को विदेशः सविद्यानाम् ?
13. न हि सुखं दुखैर्विना लभ्यते ।
14. सत्यमेव जयते नाऽनृतम् ।
15. अलसस्य कुतो विद्या ।

### शब्दार्थाः

गरीयसी = बड़ी है।
पुंसाम् = मनुष्य के लिए
जीर्णाः= बूढ़ी (पुरानी)
विभूतयः = धन, सम्पत्ति
कुतो = कहाँ

भूषणम् = गहना
मनस्वी = विचारशील
सर्वधन-प्रधानम् = सब धनों में श्रेष्ठ
वसुधैव = पृथ्वी ही
अनृतम् = झूठ

## अभ्यास

**प्रश्न 1. कोई दस सूक्तियाँ कण्ठस्थ करो और उन्हें अर्थ सहित लिखो —**

**प्रश्न 2. निम्नलिखित सूक्तियों को पूरा करो —**

(क) अभ्यासेन सर्वं ................. ।

(ख) वाग्भूषणं ................ ।

(ग) ............. तु वसुधैव कुटुम्बकम् ।

(घ) विद्याधनं सर्वधन- ................. ।

(ङ) अलसस्य कुतो ............. ।

**प्रश्न 3. निम्नलिखित भावों से सम्बन्धित सूक्तियाँ संस्कृत में लिखो –**

(क) परोपकार ही सज्जनों का धन होता है ।

(ख) विद्या धन सब धनों में श्रेष्ठ है।

(ग) सुपुत्र कुल का दीपक होता है ।

(घ) वाणी का आभूषण ही श्रेष्ठ आभूषण है।

(ङ) इच्छाएँ बूढ़ी नहीं होतीं, हम ही बूढ़े हो जाते हैं।

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) अभ्यास से सभी कार्य सिद्ध होते हैं।

(ख) सत्य की ही जीत होती है।

(ग) आलसी को विद्या कहाँ ?

(घ) सत्संगति मनुष्य के लिए क्या नहीं करती ?

*****

एकादशः पाठः

# सद्-व्यवहारः

शोभनः व्यवहारः सद्-व्यवहारः । अयं मानवस्य भूषणम् अस्ति। अयं मनुष्यस्य सर्वश्रेष्ठः गुणः अस्ति । सद्-व्यवहार-शीलः पुरुषः सर्वत्र सम्मानं प्राप्नोति।

छात्राः ! प्रातः उत्थाय मातरं पितरं च नमत । तयोः आज्ञां सदा पालयत । प्रातः सायं च ईश्वरं भजत । विद्यालयं गत्वा गुरून् नमत । तत्र अनुशासने तिष्ठत। सहपाठिभिः सह मृदु-व्यवहारं कुरुत ।

सदैव सत्यं प्रियं च वदत । मित-भाषणं कुरुत । सर्वत्र भद्रमाचरत। सत्संगतिः सदा करणीया । सदैव विनम्राः भवत । धर्मं चरत । एतेन सुखं भवति। सर्वदा प्रसन्न-वदनाः भवत। सर्वान् जनान् मित्रभावेन पश्यत । सद्-व्यवहारेण शत्रुः अपि मित्रं भवति । सदैव परोपकार-रताः भवत । अतिथि-सेवा सर्वदा कर्त्तव्या।

परनिन्दां न कुरुत । पराधिकार-चर्चां न कुरुत । परधनं न इच्छत । कस्यचित् हृदयं न तुदत । केनचित् सह कलहः न कर्त्तव्यः । वृथालापं न कुरुत।

मोटरयाने रेलयाने च तूष्णीं भूत्वा स्थातव्यम् । अन्यैः यात्रिभिः सह सस्नेहम् आचरत । यदि कश्चित् जनः युष्मभ्यं किञ्चित् वस्तु प्रयच्छति तत् सादरं गृहीतव्यं धन्यवादः च कर्त्तव्यः ।

जीवने सद्-व्यवहारस्य महत्त्वपूर्णं स्थानम् अस्ति । भो छात्राः ! सदा सद्-व्यवहारम् आचरत ।

## शब्दार्थाः

भूषणम् = गहना

प्राप्नोति = (प्र + √ आप् , लट्
प्र०, ए० व०) प्राप्त करता है

उत्थाय = उठ कर

भजत = ( √ भज्, लोट्, म०, बहु०
व०) भजन करो

मित-भाषणम् = कम बोलना

प्रसन्नवदनाः = हँस मुख

परोपकार-रताः = (पर + उपकार रतः)
दूसरों की भलाई में लगे हुए

पराधिकार चर्चाम् = (पर + अधिकार
चर्चाम्) दूसरों के काम की चर्चा को

इच्छत = ( √इष्, लोट् म०, बहु०
व०) (तुम सब) चाहो

कस्यचित् = किसी का

अनुशासने = नियम में

तिष्ठत = ( √ स्था, लोट्, म० बहु०
व०) (तुम सब) रहो

सहपाठिभिः = साथ पढ़ने वालों से

कुरुत = (कृ, लोट्, म०, बहु० व०)
(तुम सब) करो

तूष्णीं भूत्वा = चुप रह कर

स्थातव्यम् = ( √ स्था + तव्य, ए०
व०) ठहरना चाहिए

सस्नेहम् = प्रेम पूर्वक

किञ्चित् = कुछ

प्रयच्छति = (प्र + √ दा यच्छ) लट्,
प्र०, ए० व०) देता है

गृहीतव्यम् = ( √ग्रह + तव्य, ए०
व०) लेनी चाहिए।

वृथालापम् = (वृथा+ आलापम्) व्यर्थ
बातचीत को

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) सद्-व्यवहार का क्या अर्थ है ?

(ख) सद्-व्यवहार से क्या लाभ होता है ?

(ग) आप दैनिक जीवन में सद्-व्यवहार का पालन कैसे करोगे ?

**प्रश्न 2. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो**

विद्यालयं, छात्राः ईश्वरं, मोटरयाने।

(क) ................. प्रातः उत्थाय मातरं पितरं च नमत ।

(ख) प्रातः सायं च .............. भजत ।

(ग) ................ गत्वा गुरून् नमत ।

(घ) ............रेलयाने च तूष्णीं भूत्वा स्थातव्यम् ।

**प्रश्न 3. निम्नलिखित तालिका में दिए गए पदों से सार्थक वाक्य बनाओ।**

| | | |
|---|---|---|
| (क) | सहपाठिभिः सह | सर्वत्र सम्मानं प्राप्नोति । |
| (ख) | सद्-व्यवहारशीलः पुरुषः | मित्रभावेन पश्यत । |
| (ग) | सर्वान् जनान् | मित्रं भवति । |
| (घ) | सद् व्यवहारेण शत्रुः अपि | सर्वदा कर्त्तव्या। |
| (ङ) | अतिथि-सेवा | मृदु-व्यवहारं कुरुत । |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) सदा सत्य और प्रिय बोलो।

(ख) अपने मित्र के साथ सद्-व्यवहार करो।

(ग) दूसरों की निन्दा न करो।

(घ) धर्म से सुख होता है।

(ङ) तू सद्-व्यवहार का पालन कर।

*****

द्वादशः पाठः

# विभिन्नाः संग्रहाः



(चत्वारः छात्राः आगच्छन्ति)

महेन्द्रः — सुरेन्द्र ! का वार्ता ! किमिदं तव हस्ते ?

सुरेन्द्रः — चित्रसंग्रहः अयम्, अस्माकं परिवारस्य ।

महेन्द्रः — किमस्ति अस्मिन् ?

सुरेन्द्रः — पश्य, एतत् मम पितुः छात्र-कालस्य चित्रम्, अग्रजस्य विवाहस्य चित्रं च । मम बाल्यकालस्य चित्राणि अपि पश्य ।

सुदेशः — दर्शय ! दर्शय !

सुरेन्द्रः — इदं मम विद्यालये प्रथम-प्रवेशस्य चित्रम् ।

महेन्द्रः — रे ! अस्मिन् चित्रे तु सुलघुस्त्वम् ।

सुरेन्द्रः — तदा अहं पञ्चवर्षीयः आसम् ।

सुदेशः — महेश ! किं त्वया अपि कश्चित् संग्रहः कृतः ?

महेशः — आम्, प्रैषमुद्राणां संग्रहः कृतः। यदा कदापि अहं किञ्चित् नवीनं दैशिकं वैदेशिकं वा प्रैषमुद्रं प्राप्नोमि, तत् तस्मिन् संग्रहे निवेशयामि। सुदेश, किं त्वया कश्चित् संग्रहः न कृतः ?

सुदेशः — नहि, मम ज्येष्ठः सहोदरः विविधानां दैशिकानां वैदेशिकानां च मुद्राणां संग्रहणं करोति। तस्य पार्श्वे जापान-अमेरिका-इंगलैण्डादिदेशानां तथा विभिन्न-कालेषु मुद्रितानां भारतीय-मुद्राणां च शोभनः संग्रहः अस्ति ?

महेन्द्रः — मम भगिनी विविधानां खगानां पक्ष-संग्रहणं करोति । वयं तान् दृष्ट्वा तेषां खगानां विषये ज्ञानं प्राप्नुमः प्रसीदामः च ।

सुदेशः — एभिः संग्रहैः अस्माकं ज्ञानवृद्धिः, मनोरंजनं, अवकाश-कालस्य सदुपयोगश्च भवति । अधुना अहम् अपि कञ्चित् संग्रहं करिष्यामि।

महेशः — त्वं कं संग्रहं करिष्यसि ?

सुदेशः — अहं विविधतरूणां पत्राणि संग्रहीष्यामि ।

महेशः — केचित् विविधानां कीटानां, पुष्पाणां, पाषाणानां च संग्रहं कुर्वन्ति।

सुरेन्द्रः — सर्वे अपि संग्रहाः ज्ञानवर्धकाः भवन्ति ।

(सर्वे गच्छन्ति)

**शब्दार्थाः**

विभिन्नाः संग्रहाः = भिन्न-भिन्न प्रकार की एलबमें

शोभनः = सुन्दर

का वार्ता = क्या हाल है (क्या बात है)

भगिनी = बहन

अग्रजस्य = बड़े भाई के

सहोदरः = सगा भाई

तरूणां = वृक्षों का

आम् = हाँ

सुलघु = बहुत छोटा

पाषाणः = पत्थर

प्रैषमुद्रम् = डाक-टिकट

निवेशयामि = (नि + √विश्, णिच्, लट्, उ० पु०, ए० व०) लगा देता हूँ

पार्श्वे = पास

प्रसीदामः = (प्र + √ सीद्, लट्, उ० पु०, बहु व०) खुश होते हैं

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो —**

(क) संग्रह किसे कहते हैं ?

(ख) कुछ संग्रहों के उदाहरण दो।

(ग) संग्रहों के क्या-क्या लाभ हैं ?

(घ) तुम कौन सा संग्रह करोगे ?

**प्रश्न 2. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो —**

संग्रहाः, विद्यालये, चित्रसंग्रहः, महेश !

(क) ........... अयम्, अस्माकं परिवारस्य ।

(ख) ............. किं त्वया अपि कश्चित् संग्रहः कृतः ?

(ग) इदं मम ........ प्रथम-प्रवेशस्य चित्रम् ।

(घ) सर्वे अपि ........... ज्ञानवर्धकाः भवन्ति ।

**प्रश्न 3. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो—**

(क) चत्वारः छात्राः आगच्छन्ति । (प्र० पु०, एकवचन में)

(ख) किमिदं तव हस्ते ? (म० पु०, द्विवचन में)

(ग) तदा अहं पञ्चवर्षीयः आसम् । (उ० पु०, बहुवचन में)

(घ) संग्रहाः ज्ञानवर्धकाः भवन्ति । (प्र० पु०, एकवचन में)

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) सुधा का बड़ा भाई सुन्दर पत्थरों का संग्रह करता है।

(ख) तुम कौन सा संग्रह करोगे ?

(ग) क्या तुमने भी कोई संग्रह किया है ?

(घ) संग्रह करने से ज्ञानवृद्धि होती है।

(ङ) अब मैं भी कोई संग्रह करूँगा ।

*****

## त्रयोदशः पाठः

# दीपमाला



कार्तिकमासस्य कृष्णपक्षे अमावस्यायां जनाः स्वगृहेषु मालारूपेण दीपान् स्थापयन्ति । तेन एव एषः उत्सवः 'दीपमाला' इति प्रसिद्धः । वर्षर्तौ प्रभूत-जल-वर्षणात् धरणी पङ्किला भवति । शरदृतौ पङ्कं शुष्यति । शुभ्रासु दिशासु सुगन्धाः वाताः चलन्ति। सुप्रभः दिवाकरः प्रियः लगति । तदा एकस्यां रात्रौ च अयं उत्सवः भवति ।

यदा भगवान् रामः रावणं जित्वा अयोध्यायां प्रत्यागच्छत् तदा सर्वप्रथमा दीपमाला अयोध्यावासिभिः कृता । ते घृतदीपान् प्रज्वाल्य स्वं हर्षं प्रकटम् अकुर्वन्। तदारभ्य दीपमाला-महोत्सवः लोकैः प्रचलितः अभवत् ।

अस्मिन् एव दिने जैनानां अन्तिम-तीर्थकरं महावीरं मोक्षम् अमिलत्। अस्मिन् एव दिवसे आर्य-समाज-प्रवर्तकः महर्षिः दयानन्दः स्वर्गं गतः । ग्वालियर-कारागारात् मुक्तः षष्ठः सिक्ख-गुरुः श्री हरगोविन्दः अस्मिन् एव दिने 'अमृतसरं' अगच्छत् । अस्मिन् एव दिने स्वामी रामतीर्थः देहं त्यक्त्वा मुक्तः अभवत्। अतः सर्वेषां भारतीयानां कृते इदं पुण्यकारकं दिनम् अस्ति ।

दीपमालायाः पूर्वम् एव जनाः तस्याः स्वागताय सयत्नाः भवन्ति । ते त्रयोदश्यां हाटकात् नवीनानि पात्राणि क्रीत्वा गृहम् आनयन्ति। अन्येद्युः नरकचतुर्दश्यां स्वगृहाणि निर्मलानि कुर्वन्ति । अस्मिन् एव दिने भगवता नरकासुर-वधः कृतः। अस्मिन् एव दिने नृसिंहः भक्तं प्रह्लादम् अरक्षत्। अमावस्यायां जनाः विपणेः मिष्ठान्नं फलानि च आनयन्ति । रात्रौ गृहे-गृहे लक्ष्मीपूजनं भवति । पंक्तिबद्धाः ज्वलिताः दीपाः अपूर्वां शोभां जनयन्ति । नगराणि प्रकाशजलधौ निमग्ना इव भवन्ति ।

अस्य उत्सवस्य एकः दोषः अपि अस्ति, यत् दीपमालारात्रौ केचित् जनाः द्यूतक्रीडां कुर्वन्ति । परिहरणीयः अस्माभिः एषः दोषः ।

**शब्दार्थाः**

प्रभूतम् = अत्यधिक
सुगन्धाः = खुशबूदार
सुप्रभः = पूरी रोशनी के साथ
पंक्तिबद्धाः = पंक्ति बांधे हुए
निमग्ना = डूबे हुए
वहन्ति = बहती है
विपणेः = बाजार से
प्रभुत-जलवर्षणात् = अत्यधिक वर्षा होने के कारण
जित्वा = जीतकर
त्यक्त्वा = त्याग कर
कृतः = किया गया
भगवता = भगवान के द्वारा
पङ्किला = (पङ्क + इल, स्त्री, ए० व०) कीचड़ वाली
अपूर्वा = अनोखी
द्यूतक्रीडाम् = जुए को
परिहरणीयः = (परि √हृ + अनीय, पु०, ए० व०) दूर करना चाहिए।
मिष्ठान्नं = मिठाई
स्थापयन्ति = रखते हैं
प्रज्वाल्य = प्रज्जवलित करके
शुभ्रासु = सफेद (उज्ज्वल)
दिशासु = दिशाओं में
आनयन्ति = लाते हैं
अरक्षत् = रक्षा की

अन्य + एद्यु: = दूसरे दिन (अगले दिन)

पुण्यकारकं = पुण्यशाली

भारतीयानां = भारतीयों के लिये

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो —**

(क) दीपमाला त्यौहार किस महीने तथा किस दिन मनाया जाता है ?

(ख) यह त्यौहार क्यों मनाया जाता है ?

(ग) दीपमाला को पुण्य कारक दिन क्यों कहा जाता है ?

(घ) दीपमाला किस तरह मनाई जाती है ?

**प्रश्न 2. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो —**

रावणं, नृसिंह:, महर्षि: दयानन्द:, कार्तिक ।

(क) ............मासस्य कृष्णपक्षे अमावस्यायां जना: स्वगृहेषु मालारूपेण दीपान् स्थापयन्ति।

(ख) अस्मिन् एव दिने ......... भक्तं प्रह्लादम् अरक्षत् ।

(ग) आर्यसमाज-प्रवर्तक:........ स्वर्ग गत: ।

(घ) भगवान राम: ......... जित्वा अयोध्यायां प्रत्यागच्छत् ।

**प्रश्न 3. निम्नलिखित तालिका में दिए गए पदों से सार्थक वाक्य बनाओ —**

| | | |
|---|---|---|
| (क) | वर्षतौ -प्रभूत-जल वर्षणात् धरणी | इदं पुण्यकारकं दिनम् । |
| (ख) | अत: सर्वेषां भारतीयानां कृते | अयोध्यावासिभि: कृता । |
| (ग) | तदा सर्वप्रथमा दीपमाला | दिने 'अमृतसरं' अगच्छत् । |
| (घ) | गुरु: श्री हरगोविन्द: अस्मिन् एव | पङ्किला भवति। |

**प्रश्न 4. संस्कृत में अनुवाद करो —**

(क) वे दोनों जुआ खेलते हैं।

(ख) हम लक्ष्मी का पूजन करते हैं।

(ग) दीपमाला को पुण्यकारक दिन कहते हैं।

(घ) आर्य समाज के प्रवर्त्तक महर्षि दयानन्द थे।

*****

## चतुर्दश: पाठ:

# भगतसिंह:



एतत् आत्म-बलिदानिन: भगतसिंहस्य चित्रमस्ति। भगतसिंहस्य जन्म 1907 तमे ईसाब्दे सितम्बर-मासे अभवत् । तस्य पिता किशनसिंह: आसीत्। तस्य माता वीरहृदया महिला आसीत् । भगतसिंहस्य जन्मन: समये तस्य पिता पितृव्य: च कारागारे बन्दिनौ आस्ताम्। जन्मन: समये एव तयो: कारागारात् मुक्ते: समाचार: आगत: । अत एव तस्य पितामही तं 'भागोंवाला' इति नाम्ना संबोधनम् अकरोत् । स एव 'भागोंवाला' पश्चात् 'भगतसिंह' इति नाम्ना प्रसिद्ध: अभवत्।

भगतसिंहस्य प्राथमिकी शिक्षा बंगायाः प्राइमरी-विद्यालये अभवत्। तत् पश्चात् सः लाहौर नगरस्य डी.ए.वी. विद्यालये अपठत्। अत्रैव सः 'मैट्रिक' कक्षाम् उत्तीर्य नेशनल-महाविद्यालये एफ.ए. कक्षायां प्रवेशं प्राप्तवान्।

तदा देशस्य प्रान्ते-प्रान्ते स्वतन्त्रतायाः आन्दोलनम् अभवत् । भगतसिंहे अपि एतद् आन्दोलनस्य प्रभावः अभवत् । सः अध्ययनं परित्यज्य देशसेवायां रतः आसीत्। अस्य सम्पर्कः बहुभिः क्रान्तिकारिभिः सह अभवत् ।

1928 तमे ईसाब्दे साइमन-आयोगस्य भारतीयैः बहिष्कारः कृतः। लाहौर-नगरे साइमन-आयोगस्य विरोधं कर्तुं लाला-लाजपतरायः नेतृत्वम् अकरोत्। आंग्ल-देशीय-साण्डर्सेन-कृतैः लगुड-प्रहारैः लाला लाजपतरायः अमरत्वं प्राप्तवान्। प्रतिशोध-ज्वाला-ज्वलिताः पंजाब-प्रदेशस्य वीराः भगतसिंह-राजगुरुः आदयः प्रतीकाराय दृढनिश्चयम् अकुर्वन् ।

1928 तमे ईसाब्दे प्रतिशोध-परायणः भगतसिंहः साण्डर्सं हत्वा स्वप्रतिज्ञां पूरितवान्। 1929 तमे ईसाब्दे सभायां भगतसिंहः तस्य मित्राणि च बमविक्षेपम् अकुर्वन्। फलस्वरूपेण 1931 तमे ईसाब्दे मार्च मासस्य त्रयोविंशति-तारिकायां भगतसिंहः हसन्-हसन् मृत्युपाश-फलकम् आरुह्य निजप्राणान् अत्यजत् । तस्य बलिदानि-स्मारकः पंजाब-प्रदेशस्य-नवांशहर-मण्डलस्य खट्कड़कला ग्रामे निर्मितः अस्ति।

## शब्दार्थाः

बलिदानिनः = शहीद
कारागारे = जेल में
मुक्तेः = छूटने का
पितामही = दादी
प्रत्यादेशं = विरोध
बलिदानि-स्मारकः = शहीदी स्मारक
बम-विक्षेपं = बम फैंकना
मण्डलस्य = ज़िले के

प्राप्तवान् = प्राप्त किया ।
बहिष्कारः = बायकाट अथवा निष्कासन
लगुड-प्रहारैः = डण्डों के प्रहार से
परित्यज्य = छोड़ कर
प्रतिशोध-ज्वाला ज्वलिताः = बदले की आग से जले हुए
प्रतीकाराय = बदला लेने के लिए
दृढ़निश्चयं = दृढ़ प्रतिज्ञा
आरुह्य = चढ़कर

निर्मितः = बना हुआ
प्रतिशोधपरायणः = बदले की भावना से युक्त
मृत्युपाश-फलकम् = फाँसी के पट्टे पर

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) भगत सिंह का जन्म कब हुआ ?

(ख) भगत सिंह के पिता का नाम क्या था ?

(ग) भारत में साइमन कमीशन कब आया ?

(घ) भगत सिंह ने कैसे प्रतिज्ञा पूरी की ?

**प्रश्न 2. निम्नलिखित संज्ञा शब्दों से रिक्त स्थानों की पूर्ति करो —**

क्रान्तिकारिभिः, कारागारात्, किशनसिंहः, भगतसिंहस्य।

(क) तस्य पिता .............. आसीत् ।

(ख) .............. प्राथमिकी शिक्षा बंगायाः प्राइमरी विद्यालये अभवत्।

(ग) अस्य सम्पर्कः बहुभिः .......... सह अभवत् ।

(घ) जन्मनः समये एव तयोः ............मुक्तेः समाचारः आगतः ।

**प्रश्न 3. निम्नलिखित तालिका में दिये गए पदों से सार्थक वाक्य बनाओ —**

| | |
|---|---|
| (क) भगतसिंहस्य जन्मनः समये | साइमन-आयोगस्य भारतीयैः बहिकारः कृतः । |
| (ख) 1928 तमे ईसाब्दे | भगतसिंहः तस्य मित्राणि च बमविक्षेपम् अकुर्वन्। |
| (ग) 1929 तमे ईसाब्दे | 1907 तमे ईसाब्दे सितम्बरमासे अभवत् । |
| (घ) भगतसिंहस्य जन्म | तस्य पिता पितृव्यः च कारागारे बन्दिनौ आस्ताम् । |

**प्रश्न 4. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो —**

(क) <u>स</u> एव भागोंवाला पश्चात् 'भगतसिंह' इति नाम्ना प्रसिद्धः <u>अभवत्</u>

(मध्यम पुरुष एकवचन)।

(ख) तत् पश्चात् <u>सः</u> लाहौर-नगरस्य डी.ए.वी. विद्यालये <u>अपठत्</u> ।

(मध्यम पुरुष द्विवचन)

(ग) <u>सः</u> अध्ययनं परित्यज्य देशसेवायां रतः <u>आसीत्</u>

(प्रथम पुरुष, बहु वचन)

(घ) <u>सः</u> मैट्रिक कक्षां उत्तीर्य एफ.ए. कक्षायां प्रवेशं <u>प्राप्तवान्</u>।

(उत्तम पुरुष, एकवचन)

**प्रश्न 5. संस्कृत में अनुवाद करो —**

(क) भगत सिंह का जन्म 1907 में हुआ।

(ख) सबने साइमन कमीशन का बहिष्कार किया।

(ग) तूने दृढ़ प्रतिज्ञा की।

(घ) भगतसिंह के पिता किशनसिंह थे।

*****

## पञ्चदशः पाठः

# सुभाषितानि

1. उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
   न हि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः ॥

2. विद्या विवादाय धनं मदाय शक्ति-परेषां परपीडनाय ।
   खलस्य साधोः विपरीतम् एतद् ज्ञानाय दानाय च रक्षणाय ॥

3. माता शत्रुः पिता वैरी, येन बालो न पाठितः
   न शोभते सभा मध्ये, हंस मध्ये बको यथा ॥

4. प्रिय-वाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः
   तस्मात् तदेव वक्तव्यं, वचने का दरिद्रता ॥

5. दुर्लभं संस्कृतं वाक्यं, दुर्लभः क्षेमदः सुतः ।
   दुर्लभा विमला बुद्धिः, दुर्लभः स्वजनः प्रियः ॥

6. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
   वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

7. यस्मिन् देशे न सम्मानः न वृत्तिः न च बान्धवाः
   न च विद्यागमः कश्चित्, तं देशं परिवर्जयेत् ॥

8. दुर्जनः परिहर्त्तव्यः विद्ययाऽलंकृतोऽपि सन् ।
   मणिना भूषितः सर्पः किमसौ न भयंकरः ॥

### शब्दार्थाः

विपरीतम् = उलट

मदाय = मस्ती के लिए

परेषां = दूसरों को

वृत्ति = व्यवसाय

दुर्जनाः = दुष्ट

परिहर्त्तव्यः = छोड़ देना चाहिए।

विमला = स्वच्छ (बुद्धि)
कार्यहन्तारं = काम बिगाड़ने वाला
पयोमुखम् = दूध के मुख वाला
अलंकृत = सुशोभित
भूषितः = सुसज्जित
विष कुम्भं = ज़हर से भरा हुआ घड़ा

**अभ्यास**

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो —**

(क) मनुष्य के कार्य किस प्रकार सिद्ध होते हैं ?

(ख) हमें किस प्रकार की वाणी बोलनी चाहिए ?

(ग) इस संसार में मनुष्य के लिये क्या-क्या दुर्लभ है ?

(घ) किस प्रकार के मित्र का परित्याग करना चाहिए ?

**प्रश्न 2. किन्हीं पाँच सुभाषितों को कण्ठस्थ करो —**

**प्रश्न 3. वाक्यों को पूरा करो —**

(क) माता शत्रुः पिता वैरी, येन ...................... ।

(ख) प्रिय-वाक्य-प्रदानेन सर्वे ........................ ।

(ग) तस्मात् तदेव वक्तव्यं, वचने ...................... ।

(घ) वर्जयेत् तादृशं मित्रं विषकुम्भं ................ ।

(ङ) मणिना भूषितः सर्पः, किमसौ ...................... ।

*****

षोडशः पाठः

# बालकः ध्रुवः



पुरा भारतवर्षे उत्तानपादः नाम नृपः आसीत् । सुनीतिः सुरुचिः च तस्य द्वे महिष्यौ आस्ताम् । सुरुचिः नृपस्य प्रिया आसीत्, सुनीतिः च उपेक्षिता । सुरुचेः उत्तमः, सुनीतेः च ध्रुवः नाम पुत्रः आसीत् ।

एकदा नृपः उत्तमं स्निह्यति स्म। तम् अवलोक्य ध्रुवः अपि स्नेहेन पितरं प्रत्यगच्छत्, अंके च उपवेष्टुम् ऐच्छत् । परं नृपः ध्रुवम् अंके स्थानम् न अयच्छत्, न तु तेन सह स्नेहेन वार्तां अकरोत् । तस्य विमाता सुरुचिः कटुवचनैः तस्मै अकुप्यत्। ''न तव भाग्ये नृपांकः ।'' अनेन ध्रुवः निराशः अभवत् ।

ध्रुवः सर्वं वृत्तान्तं निजमात्रे अकथयत् । सा अपि दुखिता अभवत्। सा

ध्रुवम् अंके धारयित्वा, स्नेहेन च अकथयत् — ''वत्स, स्वदुःख-नाशाय भज श्रीहरिं जगत्-पितरम् ।''

मात्रा प्रेरितः पंचवर्षीयः ध्रुवः राजगृहं-त्यक्त्वा तपः तप्तुं वनम् अगच्छत्। मार्गे महामुनिः नारदः तम् अमिलत्। तस्य दृढ-निश्चयं ज्ञात्वा नारदः प्रसन्नः अभवत्। सः तम् अवदत्—''वत्स, श्रीहरिः यमुनातटे मधुवने वसति, तत्र गत्वा तं भज।'' नारदस्य उपदेशानुसारं ध्रुवः 'ओम् नमो भगवते वासुदेवाय' इति मन्त्रस्य जापं अकरोत्। ध्रुवस्य दृढभक्त्या प्रसन्नः श्रीहरिः तस्य समक्षम् आगच्छत्। ध्रुवः श्रीहरिं दृष्ट्वा प्रसन्नः अभवत्, अनमत् च। श्रीहरिणा तस्मै वरः दत्तः ''चिरं जीव, सफल-मनोरथः च भव।''

ध्रुवं प्रत्यागतं श्रुत्वा नृपः सपरिवारः तस्य अभिनन्दनाय प्रासादात् बहिः आगच्छत्। ध्रुवः पितरम् अनमत्, उभयोः मात्रोः चरणौ अस्पृशत्, प्रियं भ्रातरम् उत्तमम् आलिङ्गनं कृत्वा अमिलत्। तस्य प्रत्यागमनेन सर्वे समुदाः अभवन्।

वृद्धः उत्तानपादः ध्रुवं युवराजम् अकरोत्। सः अचिरात् एव प्रजायाः प्रियः अभवत् ।

**शब्दार्थाः**

महिष्यौ = दो रानियाँ

क्रोडे कृत्वा = गोद में लेकर

विमाता = सौतेली माता

ज्ञात्वा = (√ ज्ञा + क्त्वा) = जानकार

धारयित्वा= धारण करके अथवा बैठाकर

वत्स = बेटा

नृपांक = राजा की गोद

श्रुत्वा = (√ श्रु + क्त्वा) = सुनकर

समुदाः = प्रसन्न

भज = तुम भजन करो

स्वदुःखनाशाय = अपने दुःख को नष्ट करने के लिए

उपेक्षिता = छोड़ी हुई

उपवेष्टुम् = (उप + विश् + तुमुन्) = बैठने के लिये

कटुवचनैः = कड़वे वचनों से

समक्षम् = सामने

प्रत्यागतम् = वापस आया हुआ

अभिनन्दनाय = स्वागत के लिए

प्रासादात् = महल से

अनमत् = प्रणाम किया

अमिलत् =मिला (√ मिल - लङ् लकार प्र.पु. ए.व.)

मात्रोः = माताओं के

अस्पृशत् = छूए | स्निह्यति स्म = प्यार करता था
राजगृहम् = महल | तपः तप्तुम् = तपस्या करने के लिए
उपदेशानुसारं = उपदेश के अनुसार

**अभ्यास**

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) ध्रुव के माता-पिता का नाम बताओ ?

(ख) ध्रुव को कटु वचन किसने कहे ?

(ग) ध्रुव को भक्ति का मार्ग किसने बताया ?

(घ) ध्रुव ने कौन से मन्त्र का जाप किया ?

**प्रश्न 2. निम्न तालिका में दिए गए पदों से सार्थक वाक्य बनाओ—**

| | |
|---|---|
| सुनीतिः सुरुचिः तस्य | तम् अमिलत् । |
| तस्य विमाता सुरुचिः | ध्रुवं युवराजम् अकरोत् । |
| मार्गे महामुनिः नारदः | इति मन्त्रस्य जापं अकरोत् । |
| वृद्धः उत्तानपादः | द्वे महिष्यौ आस्ताम् । |
| ध्रुवः ओम् नमो भगवते वासुदेवाय | कटुवचनैः तस्मै अकुप्यत् । |

**प्रश्न 3. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो —**

ध्रुवम्, नारदः, सुरुचिः, उत्तानपादः,

(क) पुरा भारतवर्षे ............. नाम नृपः आसीत् ।

(ख) सुनीतिः ........... च तस्य द्वे महिष्यौ आस्ताम् ।

(ग) तस्य दृढ निश्चयं ज्ञात्वा ............. प्रासीदत् ।

(घ) वृद्धः उत्तानपादः .............युवराजम् अकरोत् ।

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) श्रीहरि मधुवन में रहते हैं।

(ख) ध्रुव ने पिता को प्रणाम किया ।

(ग) ध्रुव निराश हो गया।

(घ) वह मन्त्र का जाप करता है ।

(ङ) राजा उत्तानपाद ने ध्रुव को युवराज बनाया।

## सप्तदशः पाठः

# अस्माकं प्रदेशः



भारतम् एकः विशालः देशः अस्ति । अस्मिन् बहवः प्रदेशाः सन्ति। तेषु अस्माकं पञ्चापः एकोऽस्ति। अस्य सीमाप्रदेशेषु राजस्थान-हिमाचलप्रदेश-हरियाणा-प्रान्ताः सन्ति। पुरा एषः पंच-नदानां प्रदेशः आसीत्, अतः पञ्चापः इति नाम्ना प्रसिद्धः ।परम् इदानीं शतद्रुः, विपाशा, इरावती च अस्य प्रधानाः नद्यः सन्ति।

अयं प्रदेशः कृषिप्रधानः । अस्य भूमिः उर्वरा अस्ति। अत्रत्याः कृषकाः परिश्रमशीलाः सन्ति। ते नवीनतमैः यन्त्रैः कृषिं कुर्वन्ति प्रभूतं चान्नम् उत्पादयन्ति। अतएव अयं प्रदेशः भारतस्य 'अन्नभंडारम्' इति प्रसिद्धः ।

उद्योगस्य क्षेत्रे पञ्चापेन अधिका प्रगतिः कृता । अत्र अनेका यन्त्रशालाः

सन्ति। तत्र विविधानां वस्तूनाम् उत्पादनं भवति ।

क्रीडाक्षेत्रे अपि अस्माकं प्रदेश: अग्रगण्य: । अत्रत्यै: धावकै: क्रीडकै: च निज-क्रीडाकुशलतया भारतस्य नाम संसारे प्रख्यापितम् ।

पञ्चापस्य जना: वीरा: स्वस्था: च सन्ति। अत: पञ्चाप: भारतस्य खड्गधर: हस्त: अस्ति। अयं संकटकाले अन्येषां प्रदेशानां सहायतां करोति ।

उत्सवप्रिया: पञ्चपीया: समये-समये विविधान् उत्सवान् मानयन्ति । 'भांगड़ा' पञ्चापीयानां प्रसिद्धं नृत्यम् अस्ति। रम्यस्थलानि द्रष्टुं सहस्रश: पर्यटका: प्रतिवर्षम् अत्र आगच्छन्ति ।

पञ्चाप: ऋषीणां गुरूणां महापुरुषाणां च जन्मभूमि: अस्ति। अत्र अनेकानि तीर्थानि सन्ति, यत्र गत्वा जना: स्वजीवनं धन्यं मानयन्ति ।

वयं सदा निजप्रदेशस्य उन्नतिम् इच्छाम: ।

### शब्दार्था:

| | |
|---|---|
| सीमा प्रदेशा: = सीमा के साथ लगने वाले प्रदेश | पञ्चाप: = पंजाब |
| | विपाशा = व्यास |
| शतद्रु = सतलुज | नद्य: = नदियाँ |
| इरावती = रावी | प्रगति: = उन्नति |
| उर्वरा = उपजाऊ | अग्रगण्य: = आगे गिने जाने वाला |
| अत्रत्या: = यहाँ के | प्रख्यापितम् = प्रसिद्ध किया |
| यन्त्रशाला: =कारखाने | सहस्रश: = हजारों |
| धावकै: = दौड़ने वालों द्वारा | मानयन्ति = (√ मानय,लट्,प्र०, पु०, ब०,व०) मानते हैं |
| खड्गधर: हस्त: = तलवार धारी हाथ | |
| रम्यस्थलानि = सुन्दर स्थान | पर्यटका: = भ्रमण करने वाले |

### अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का हिन्दी में उत्तर लिखो—**

(क) पंजाब की मुख्य नदियों के नाम बताइए ?

(ख) पंजाब के सीमा प्रदेश कौन-कौन से हैं ?

(ग) पंजाब के लोगों की क्या विशेषता है ?

(घ) पंजाब के प्रसिद्ध नृत्य का नाम बताइए ।

**प्रश्न 2. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करें ।**

पञ्चापः, कृषकाः, भांगड़ा, भारतम्

(क) ................. एकः विशालः देशः अस्ति।

(ख) अतः ..............इति नाम्ना प्रसिद्धः ।

(ग) ................ पञ्चापीयानां प्रसिद्धं नृत्यम् अस्ति ।

(घ) .................परिश्रमशीलाः सन्ति।

**प्रश्न 3. रेखांकित शब्दों में यथानिर्दिष्ट पुरुष/वचन में परिवर्तन करो—**

(क) वयं सदा उन्नतिम् इच्छामः । (उत्तम पुरुष एकवचन)

(ख) पञ्चापीयाः उत्सवान् मानयन्ति । (प्रथम पुरुष एकवचन)

(ग) ते कृषिं कुर्वन्ति । (उत्तम पुरुष बहुवचन)

(घ) ते नवीनतमैः यन्त्रैः कृषिं कुर्वन्ति (मध्यम पुरुष बहुवचन)

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) भारत एक विशाल देश है।

(ख) हम सदा अपने प्रान्त की उन्नति चाहते हैं ।

(ग) पंजाब के पुरुष बहादुर हैं।

(घ) पंजाब कृषि-प्रधान प्रदेश है।

(ङ) वे बहुत अनाज उत्पन्न करते हैं।

*****

अष्टादशः पाठः

# लाला-लाजपतरायः



लाला लाजपतरायः भारतस्य महान् सुपुत्रः आसीत् । भारतीयाः जनाः तं 'पञ्चाप-केसरी' कथयन्ति।

लाला लाजपतरायस्य जन्म पञ्चाप-प्रदेशस्य 'ढु डीकेग्रामे' १८६५ तमे ईसवीय-वत्सरे अभवत्। तस्य पिता श्री राधा कृष्णः एकः कुशलः अध्यापकः आसीत् ।

लाला लाजपतरायः कुशाग्र-बुद्धिः छात्रः आसीत् । तं प्रायः परीक्षासु प्रथम-स्थानं छात्रवृत्तीः च अमिलत्। शिक्षायाः पश्चात् सः विधिवक्ता अभवत् ।

लाला-लाजपतरायः स्वतन्त्रता-संग्रामे महत् कार्यम् अकरोत् । सः निर्भीकः नेता आसीत् । सः अनेकवारं कारागारम् अगच्छत् । आंग्ल-शासकाः तस्मै बहूनि

दु:खानि अयच्छन् । परं स: वीर: स्वनिश्चयात् न व्यचलत् । स: धैर्येण देशस्य सेवा-कार्यम् अकरोत् । लाला-लाजपतराय: स्वभाषणै:, पुस्तकै: समाचारपत्रै: च स्वतन्त्रताया: आन्दोलनस्य प्रचारमकरोत् । स्वतन्त्रता-कार्याय-स: अमेरिका-देशमपि अगच्छत् ।

१९२८ तमे ईसवीय वत्सरे आंग्लदेशात् 'साइमन शिष्टमण्डलम्' भारतम् आगच्छत्। यदा तत् मण्डलं लवपुरमागच्छत्, तदा जना: लाजपतरायस्य नेतृत्वे तस्य विरोधम् अकुर्वन् । आंग्लराजपुरुषै: तस्योपरि यष्टिका-प्रहारा: कृता:। एभि: प्रहारै: स: प्राणान् अत्यजत्। परन्तु निधनात् पूर्वं स: अवदत्, ''मम उपरि कृता: प्रहारा: आंग्ल-साम्राज्यस्य शव-वस्त्रे कीलका: भविष्यन्ति।'' तस्य इयं वाणी सत्या अभवत्। अस्य वीरस्य मृत्युना सकल: देश: शोक-निमग्न: अभवत्। लाला लाजपतरायस्य नाम चिरस्मरणीयं भविष्यति।

## शब्दार्था:

पञ्चाप केसरी = पंजाब का शेर
विधिवक्ता = वकील
कारागारम् = जेल को
व्यचलत् = (वि + √चल्, लङ् ,प्र० पु०, ए० व०) न हिला
नेतृत्वे = अगवाई में, अगवानी में
निधनात्-पूर्वम् = मरने से पहले
प्रहारा: = चोटें
शववस्त्रे = कफन में.
अमिलत् = मिली
कुशाग्रबुद्धि: = तीव्र बुद्धि
यष्टिका = लाठी
वत्सरे = वर्ष में

आंग्ल-शासका: = अंग्रेज शासक
तस्मै = (तद्, च०, ए० व०) उसके लिए
स्वनिश्चयात् = अपने निश्चय से
कीलका: = कीलें, मेखें
शोक-निमग्न: अभवत् = शोक में डूब गया
चिरस्मरणीयं = देर तक याद रहने योग्य
स्वतन्त्रताया: = स्वतन्त्रता का
आंग्ल साम्राज्यस्य = अंग्रेजी शासन के
आंग्लराजपुरुषै: = अंग्रेज सरकार के कर्मचारियों द्वारा

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) लाला लाजपतराय का जन्म कब और कहाँ हुआ ?

(ख) उनके पिता का क्या नाम था ? वे क्या काम करते थे ?

(ग) लाला लाजपतराय ने स्वतन्त्रता प्राप्ति के लिए क्या काम किए

(घ) लाला लाजपतराय की मृत्यु कैसे हुई ?

(ङ) उनके अन्तिम शब्द क्या थे ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो —**

पञ्चाप-केसरी, लाला लाजपतराय:, अमेरिका, श्री राधा कृष्ण: ।

(क) .............. भारतस्य महान् सुपुत्र: आसीत् ।

(ख) भारतीया: जना: लाला-लाजपतरायं ............ कथयन्ति ।

(ग) लाला लाजपतरायस्य पिता ............ एक: कुशल: अध्यापक: आसीत् ।

(घ) स्वतन्त्रता कार्याय लाला लाजपतराय: ............ देशमपि अगच्छत् ।

**प्रश्न 3. रेखांकित शब्दों में निर्देश के अनुसार परिवर्तन करो—**

(क) <u>स:</u> अनेकवारं कारागारम् <u>अगच्छत्</u> । (म. पु. बहुवचन में)

(ख) <u>स:</u> देशस्य सेवाकार्यम् <u>अकरोत्</u> (उ. पु. द्विवचन में)

(ग) परं <u>स:</u> वीर: स्वनिश्चयात् न <u>व्यचलत्</u> ।(प्र. पु.बहुवचन में)

(घ) एभि: प्रहारै: <u>स:</u> प्राणान् <u>अत्यजत्</u> । (म. पु. बहुवचन में)

**प्रश्न 4. निम्नलिखित तालिका से सार्थक वाक्य बनाओ—**

| | |
|---|---|
| (क) लाला लाजपतराय: भारतस्य | छात्र: आसीत् । |
| (ख) लाला लाजपतराय: कुशाग्रबुद्धि: | शोक-निमग्न: अभवत् । |
| (ग) अस्य वीरस्य मत्युना सकल: देश: | सेवाकार्यम् अकरोत् । |
| (घ) स: धैर्येण देशस्य | महान् पुत्र: आसीत् । |

**प्रश्न 5. संस्कृत में अनुवाद करो—**

(क) लाला लाजपतराय के पिता का नाम श्री राधाकृष्ण था।

(ख) वे निर्भीक नेता थे।

(ग) उन्होंने देश की सेवा की ।

(घ) भगत सिंह महान् देश-भक्त था ।

(ङ) लाला लाजपतराय भारत का महान् सुपुत्र था।

*****

### नवदशः पाठः

# आनन्दपुरस्य महत्त्वम्



आनन्दपुरं नाम नगरं पंजाब-प्रदेशे अति-पवित्रं तीर्थस्थानम् अस्ति। सिक्खानां नवमः गुरुः श्री तेग़बहादुरः एतत् नगरं स्थापितवान् । तस्य सुतः श्री-गोबिन्दसिंहः निज-बाल्य-कालम् अत्र एव अयापयत् ।

यदा कश्मीर-वासिनः पण्डित-जनाः आनन्दपुरे आगत्य गुरु तेग़ बहादुरं निज-कष्टम् अकथयन्, तदा बालः अपि श्री-गोबिन्दसिंहः धर्मस्य रक्षायै निज-पितरम् आत्म-बलिदानाय अवदत् ।

ततः च गुरु तेग़बहादुरः दिल्ली–नगरे आत्म–बलिदानम् अकरोत् । तस्य शीर्षं दिल्ली–नगरात् जैता–नामकः भक्तः आनन्दपुरे आनयत् ।

तस्य शीर्षस्य अन्तिम–संस्कारं श्री–गोबिन्दसिंहः आनन्दपुरे अकरोत्। आनन्दपुरे एव श्री–गोबिन्दसिंहः सिक्खानां दशमः गुरुः घोषितः ।

अनन्तरं 1699–तमे वर्षे वैशाखी–पर्व–दिवसे गुरु–गोबिन्दसिंहः निज–भक्तानां समागमम् आनन्दपुरे अकरोत् । अस्मिन् समागमे बहवः जनाः समागच्छन्। तत्र गुरु–गोबिन्दसिंहः तान् बलिदानाय प्रेरयितुम् एकैकं पञ्च जनान् शीर्ष–दानाय आह्वयत्। ते एव पञ्च जनाः पञ्च–प्रियाः कथ्यन्ते। गुरु–गोबिन्दसिंहः तान् पञ्च प्रियान् अमृतपानम् अकारयत् । गुरु–गोबिन्दसिंहः स्वयमपि तेषां हस्तात् अमृतपानम् अकरोत् । एषः एव अवसरः खालसा–पन्थ–सर्जनाय प्रसिद्धः अभवत् ।

अस्मिन्नेव स्थाने गुरु–सिक्खाः प्रतिवर्षं होलामुहल्ला नामकं पर्व मानयन्ति। 1999 तमे ईसाब्दे अप्रैल मासस्य त्रयोदश–तारिकायां आनन्दपुर–साहिबे खालसा पन्थस्य स्थापनाम् अधिकृत्य त्रिशततमः समारोहः महता उत्साहेन सम्पादितः। देशात् विदेशात् च जनाः अत्र आगत्य स्वजीवनं सफलम् अकुर्वन् । आनन्दपुर–साहिबं परितः क्रोशं यावत् दीपमाला आसीत् । केशगढ़–साहिब गुरुद्वारस्य शोभा तु तदा अद्वितीया एव आसीत् । सत्यम् एव, आनन्दपुर–नगरम् परमानन्दस्य स्थानम् अस्ति ।

## शब्दार्थाः

बाल्य–कालम् – बचपन के समय को

निर्मितम् = बना हुआ

समागमम् = इकट्ठ को

प्रेरयितुम् = प्रेरणा देने के लिए

आह्वयत् = बुलाया

त्रिशततमः = तीन सौवां

अयापयत् = बिताया ।

स्मारयति = याद कराता है ।

समागच्छन् = इकट्ठे हुए।

एकैकम् = एक–एक करके।

क्रोशं यावत् = एक मील तक

परमानन्दस्य = परम आनन्द का

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) आनन्दपुर साहिब कहाँ स्थित है ?

(ख) खालसा पंथ की स्थापना कब हुई ?

(ग) खालसा पंथ की स्थापना किसने की ?

**प्रश्न 2. निम्नलिखित रिक्त स्थानों की पूर्ति करो —**

जैता, तेगबहादुर:, गोबिन्दसिंह:, आनन्दपुरं ।

(क) ............ नाम नगरं पंजाब प्रदेशे अति पवित्रं तीर्थ-स्थानम् अस्ति।

(ख) गुरु: ............ दिल्ली-नगरे आत्म-बलिदानं अकरोत् ।

(ग) गुरु: ........ तान् पञ्च प्रियान् अमृतपानम् अकारयत् ।

(घ) तस्य शीर्षं दिल्ली-नगरात् ........... नामक: भक्त: आनन्दपुरे आनयत्।

**प्रश्न 3. निम्नलिखित तालिका में दिए गए पदों से सार्थक वाक्य बनाओ —**

| | |
|---|---|
| (क) तस्य सुत: श्री गोबिन्दसिंह: निज-बाल्यकालम् | गुरु: घोषित: । |
| (ख) श्री गोबिन्दसिंह: धर्मस्य रक्षायै निज-पितरम् | प्रसिद्ध: अभवत् । |
| (ग) एष: एव अवसर: खालसा-पन्थ-सर्जनाय | आत्म-बलिदानाय अवदत्। |
| (घ) गुरु: गोबिन्द सिंह: सिक्खानां दशम: | अत्र एव अयापयत्। |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) पाँच प्यारों ने अमृत पान किया ।

(ख) वह दसवें गुरु थे ।

(ग) वह फल लाता है ।

(घ) उसने अपना कष्ट कहा ।

*****

विंशः पाठः

# श्रद्धायाः चमत्कारः



गुरुः द्रोणाचार्यः युद्धस्य कलासु निपुणः आसीत् । तस्य ख्यातिः सर्वत्र अभवत्। एकलव्यो नाम युवको धनुर्विद्यां शिक्षितुम् ऐच्छत् । सः द्रोणाचार्यस्य समीपं अगच्छत् । सः आचार्यं प्रणम्य अवदत् -- ''आचार्यवर्याः ! शिष्यो भूत्वा एतौ चरणौ सेवितुम् इच्छामि ।''

आचार्यः तम् अपृच्छत् — ''कस्य पुत्रोऽसि ?'' एकलव्यः प्रत्यवदत्— ''अहं निषादस्य पुत्रः अस्मि।'' आचार्यः अकथयत् — ''तदा एतत् न सम्भवति।''

एकलव्यो निराशो भूत्वा वनं अगच्छत्। तत्र सः आचार्यस्य मृण्मयीं मूर्तिम् रचयित्वा तां प्रणम्य अभ्यासं आरब्धवान्। एवं सः प्रतिदिनम् आचार्यस्य मूर्तिम् प्रणम्य बाणानां प्रक्षेपणस्य अभ्यासं करोति स्म । अभ्यासेन तं धनुर्विद्यायां

कौशलम् अमिलत्। एकदा अर्जुनः वनमगच्छत्। सः धनुर्विद्यायाम् एकलव्यस्य कौशलं दृष्ट्वा विस्मितः अभवत् ।

अर्जुनः आचार्यम् एकलव्यस्य अद्‌भुतं कौशलम् अकथयत् । आचार्योऽपि वनं गत्वा तस्य कौशलम् अपश्यत् । एकलव्यः आचार्यं प्रणम्य अकथयत्— ''आचार्यवर्याः ! युष्माकं कृपयैव धनुर्विद्यायाम् अहं किञ्चित् निपुणोः अभवम्। अहं कां दक्षिणां यच्छामि ?''

आचार्यः अचिन्तयत् —''यदि एकलव्यः शत्रूणां पक्षे भवेत्, सः अर्जुनमपि जयेत्।'' तदा आचार्यः अवदत् — ''दक्षिणस्य हस्तस्य अंगुष्ठं यच्छ ।'' एकलव्यः सहर्षम् अंगुष्ठं छित्त्वा आचार्याय अयच्छत् ।

**शब्दार्थाः**

सम्भवति = सम् + भू (भव्), सम्भव होना
अभ्यासः = अभि + अस् = अभ्यास करना
शिक्ष् = सीखना
प्रणम्य (प्र + नम् + ल्यप्) = प्रणाम करके
भूत्वा (भू + क्त्वा) = होकर
कृत्वा (कृ + क्त्वा) = बना कर
छित्त्वा (छिद् + क्त्वा) = काट कर
युवकः = नौजवान
निषादः = जंगल में रहने वाली एक जाति का व्यक्ति
अंगुष्ठः = अंगूठा
चरणौ: = पांव
यच्छ = दो
जयेत् = जीत ले

वाणः = तीर
शिष्यः = विद्यार्थी
दक्षिणस्य = दायें (हाथ) का
अद्‌भुत = अनोखा
विस्मित = हैरान
दक्षिणा = गुरु के लिए भेंट
मृण्मयी = मिट्टी की बनी हुई
मूर्ति = तस्वीर
धनुर्विद्या = तीर चलाने की विद्या
कौशलम् = निपुणता
प्रक्षेपणस्य = फैंकने का
सहर्षम् = खुशी के साथ
आरब्धवान् = आरम्भ किया
रचयित्वा = बना कर

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) एकलव्य ने द्रोणाचार्य से क्या कहा ?

(ख) द्रोणाचार्य ने एकलव्य को क्या उत्तर दिया ?

(ग) एकलव्य ने धनुर्विद्या किस प्रकार सीखी ?

(घ) द्रोणाचार्य ने एकलव्य से दक्षिणा में क्या मांगा ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो—**

निषादस्य, अर्जुनः, एकलव्यः, द्रोणाचार्यः

(क) ............. युद्धस्य कलासु निपुणः आसीत् ।

(ख) ...........निराशो भूत्वा वनं अगच्छत् ।

(ग) .......... आचार्यम् एकलव्यस्य अद्भुतं कौशलम् अकथयत् ।

(घ) अहं ......... पुत्रः अस्मि।

**प्रश्न 3. सार्थक वाक्य बनाओ—**

| | | |
|---|---|---|
| (क) | द्रोणाचार्यः युद्धस्य | मृण्मयीं मूर्तिम् अरचयत् । |
| (ख) | एकलव्यो नाम युवको | यच्छामि । |
| (ग) | अहं कां दक्षिणां | अंगुष्ठं यच्छ । |
| (घ) | दक्षिणस्य हस्तस्य | कलासु निपुणः आसीत् । |
| (ङ) | सः आचार्यस्य | धनुर्विद्यां शिक्षितुम् ऐच्छत् |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) एकलव्य धनुर्विद्या सीखना चाहता था।

(ख) वह द्रोणाचार्य के पास जाकर बोला ।

(ग) वह निराश होकर घर चला गया ।

(घ) मैं क्या दक्षिणा दूँ ?

*****

## एकविंशः पाठः

# कालिदासः



महाकवेः कालिदासस्य संस्कृत—साहित्ये महत्त्वपूर्णं स्थानम् । तं जनाः भारतस्य 'शेक्सपीयर' इति कथयन्ति । सः चत्वारि महाकाव्यानि त्रीणि नाटकानि च अरचयत् । तेषां नामानि सन्ति—ऋतु-संहारं, कुमार-सम्भवं, रघुवंशं, मेघदूतं (काव्यानि), मालविकाग्निमित्रं, विक्रमोर्वशीयं, अभिज्ञानशाकुन्तलं च (नाटकानि)।

कालिदासः विक्रमादित्यस्य राजसभायाः रत्नम् आसीत्। तस्य जन्म-समय-विषये मतभेदः अस्ति । केचित् मानयन्ति यत् कालिदासस्य जन्म-ईसा पूर्वं प्रथम शताब्द्याम् एव अभवत्। अपरे तु तं चन्द्रगुप्त-द्वितीयस्य समकालीनं कथयन्ति।

अस्ति किंवदन्ती यत् सः पूर्वं महामूर्खः आसीत्। पण्डिताः छलेन तस्य विवाहं विदुष्या विद्योत्तमया सह अकारयन्; यतः ते तस्याः गर्वम् अपहर्तुम् ऐच्छन्। तस्याः प्रतिज्ञा आसीत्—यः कश्चित् मां शास्त्रार्थे जेष्यति, सः मे भर्ता भविष्यतीति । पण्डिताः तस्यै अद्रुह्यन् । तैः मिलित्वा विचारितम्-कश्चित् महामूढः तया सह विवाहं कुर्यात् इति। अथ एकदा ते अपश्यन्—एकः पुरुषः याम् शाखां अधिष्ठितः ताम् एव मूले छेत्तुं प्रवृत्तः इति। ते तं विद्योत्तमा-समीपम् अनयन् अकथयन् च—महा-पण्डितः अयं न किञ्चित् वदति, संकेतान् एव करोति। एवं ते पण्डिताः तत्कृत संकेतानाम् अन्यत् अर्थम् कृत्वा तां शास्त्रार्थे पराजिताम् अमानयन्। तया सह तस्य विवाहं च अकारयन्।

एकदा रात्रौ उष्ट्ररवं श्रुत्वा मूढः कालिदासः 'उट्-उट्' इति अवदत् । विद्योत्तमा तं महामूर्खं मत्वा गृहात् बहिर् अकरोत्। तिरस्कारेण संतप्तः सः महाकालीम् इष्टदेवीं कृत्वा विद्याध्ययनम् अकरोत्, शीघ्रमेव कालिदासस्य रूपेण प्रसिद्धः कविः च अभवत् ।

कालिदासस्य काव्यशैली सरला सुमधुरा च अस्ति । तस्य रचनाः पठित्वा श्रुत्वा वा वयम् आनन्दम् अनुभवामः । किमधिकेन कालिदासः भारत-विभूतिः ।

**शब्दार्थाः**

अरचयत् = लिखे

अपहर्तुम् = (अप √ह + तुमुन्) दूर करने को

अधिष्ठितः = (अधि √स्था + क्त, पु०, ए०व०) बैठा हुआ

उष्ट्र-रवम् = ऊँट की आवाज़

तिरस्कारेण = अपमान से।

पराजिताम् = हारी हुई ।

जेष्यति = जीतेगा।

किंवदन्ती = जनश्रुति, अफ़वाह

अपहर्तुम् = दूर करना

ऐच्छन् = चाहा

अद्रुह्यन् = द्रोह करते थे।

मत्वा = (√मन् + क्त्वा) मानकर

मूढः = मूर्ख

संतप्तः = दुखी

छलेन = कपट से

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) कालिदास की रचनाओं के नाम लिखो।

(ख) पण्डितों ने कालिदास को मूर्ख कैसे माना ?

(ग) विद्योत्तमा ने कालिदास को घर से क्यों निकाला ?

(घ) विद्या प्राप्त करने के लिए कालिदास ने क्या किया ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो—**

विद्योत्तमया, शेक्सपीयर, महाकालीम्, कालिदासस्य ।

(क) महाकवेः .......... संस्कृत-साहित्ये महत्त्वपूर्णं स्थानम् ।

(ख) तं जनाः भारतस्य .............. इति कथयन्ति ।

(ग) पण्डिताः छलेन तस्य विवाहं विदुष्या ........... सह अकारयन् ।

(घ) सः ............ इष्टदेवीं कृत्वा विद्याध्ययनं अकरोत् ।

**प्रश 3. रेखांकित शब्दों में पुरुष-परिवर्तन करो —**

(क) <u>सः</u> चत्वारि महाकाव्यानि त्रीणि नाटकानि, च <u>अरचयत्</u> ।

(उत्तम पुरुष, ए॰ व॰ में)

(ख) <u>पण्डिताः</u> छलेन तस्य विवाहं विदुष्या विद्योत्तमया सह <u>अकारयन्</u>।

(प्रथम पुरुष, ए॰ व॰ में)

(ग) तस्य रचनाः पठित्वा <u>वयम्</u> आनन्दम् <u>अनुभवामः</u> ।

(प्रथम पुरुष, बहु॰ व॰ में)

**प्रश्न 4. संस्कृत में अनुवाद करो —**

(क) वह महामूर्ख था ।

(ख) उसकी रचना सुन्दर है।

(ग) मैं प्रतिदिन स्कूल जाता हूँ।

(घ) कालिदास विक्रमादित्य की राजसभा का रत्न था।

(ङ) उसे लोग भारत का शेक्सपीयर कहते हैं।

*****

## द्वाविंशः पाठः

# रक्तदुर्गम्

महेशः — सुरेन्द्र ! अहं रक्तदुर्गं द्रष्टुम् इच्छामि । तत्र आवां कदा गमिष्यावः ?

सुरेन्द्रः — महेश ! आवाम् आगामिनि रविवारे गमिष्यावः ?

महेशः — सुरेन्द्र ! दर्शनात् पूर्वम् अहम् अस्य विषये किञ्चित् ज्ञातुम् इच्छामि। अस्य दुर्गस्य निर्माणं कदा अभवत् ।

सुरेन्द्रः — पुरा दिल्लयां मुगल-वंशस्य शासनम् आसीत् । तदा 'शाहजहाँ' नामको नृपतिः अभवत्। तस्य निर्माण-कलायां अतीव रुचिः आसीत्। तस्य शासने बहूनां भवनानां निर्माणम् अभवत् । तदैव रक्त-दुर्गस्य निर्माणम् अभवत् ।

महेशः — किम् रक्तदुर्गम् अधुनापि तादृशम् एव अस्ति, यादृशम् इदं निर्माणकाले आसीत् ।

सुरेन्द्रः — निर्माणकाले रक्तदुर्गस्य यत् सौन्दर्यम् आसीत्, तस्य स्वल्पः अपि अंशः अधुना न अस्ति। तदेदं विविधैः अनर्घैः रत्नैः खचितम् आसीत् । तदा अस्य सौन्दर्यं लोके अनुपमम् एव आसीत् । तदा अस्य सौन्दर्यं दृष्ट्वा एकः प्रसिद्धः कविः अकथयत्—''यदि भूतले स्वर्गोऽस्ति, इहैव अस्ति ।'' रक्तदुर्गे एव प्रसिद्धं 'मयूर-सिंहासनम्' आसीत् । मुगल-शासनस्य पतनकाले रक्तदुर्गस्य अनुपमा शोभा विविधैः दस्युभिः लुण्ठिता आसीत् ।

महेशः — साम्प्रतम् अस्मिन् दुर्गे किं दर्शनीयम् अस्ति ?

सुरेन्द्रः — साम्प्रतम् अपि रक्तदुर्गं भव्यम् अस्ति । अस्मिन् 'दीवाने-आम' 'दीवाने-खास' च एते भवने दर्शनीये स्तः । अस्मिन् एकः संग्रहालयः अस्ति। तत्र मुगलकालस्य वस्तूनां संग्रहः अस्ति । अधुना रक्तदुर्गे भारतस्य ध्वजः सुशोभितः अस्ति । अस्मिन्

सैनिकाः अपि वसन्ति । रक्तदुर्गस्य ऐतिहासिकं महत्त्वम् अनुपमम् अस्ति।

## शब्दार्थाः

अधुना = आजकल
रक्तदुर्गम् = लाल किला
द्रष्टुम् = (दृश् + तुमुन्) देखने के लिए
ज्ञातुम् = ज्ञा + तुमुन् जानने के लिए
बहूनां = बहुत सारे
स्वल्पः = थोड़ा सा
अंशः = हिस्सा
भूतले = पृथ्वी पर
खचितम् = जड़ा हुआ (भरा हुआ)
दस्युः = डाकू
लुण्ठिता = लूट ली गई
साम्प्रतम् = अब
भव्यम् = सुन्दर
दर्शनीयम् = देखने योग्य
संग्रहालयः = अजायबघर
ध्वजः = झंडा
अनुपमम् = अद्वितीय
अनर्घः = अमूल्य

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) लाल किले का निर्माण कब हुआ ?
(ख) पहले लाल किले का सौन्दर्य कैसा था ?
(ग) लाल किले में क्या दर्शनीय है ?

**प्रश्न 2. निम्नलिखित शब्दों से रिक्त स्थानों की पूर्ति करो—**

भारतस्य, दिल्लयां, रक्तदुर्गं, मयूर

(क) अहं ................ द्रष्टुम् इच्छामि ।
(ख) पुरा ............. मुगलवंशस्य शासनं आसीत् ।
(ग) रक्तदुर्गे एव प्रसिद्धं ..............- सिंहासनम् आसीत् ।
(घ) अधुना रक्तदुर्गे ............ ध्वजः सुशोभितः अस्ति ।

**प्रश्न 3. निम्नलिखित तालिका से सार्थक वाक्य बनाओ—**

| | |
|---|---|
| (क) पुरा दिल्लयां | लोके अनुपमम् एव आसीत् । |
| (ख) तदा अस्य सौन्दर्यं | 'मयूर-सिंहासनम्' आसीत् । |
| (ग) रक्तदुर्गं एव प्रसिद्धं | वस्तूनां संग्रहः अस्ति । |
| (घ) तत्र मुगल-कालस्य | मुगल-वंशस्य शासनम् आसीत् । |

**प्रश्न 4. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो—**

(क) आवां आगामिनि रविवारे गमिष्याव: । (मध्यम पु॰, बहु व॰)

(ख) अहं रक्तदुर्गं द्रष्टुम् इच्छामि । (उत्तम पु॰, द्वि व॰)

(ग) अस्मिन् सैनिका: अपि वसन्ति । (प्रथम पु॰ एक व॰)

(घ) अहम् अस्य विषये किञ्चित् ज्ञातुम् इच्छामि ।(मध्यम पु॰, एक व॰)

**प्रश्न 5. संस्कृत में अनुवाद करो—**

(क) पहले लाल किला सुन्दर था ।

(ख) इसमें एक संग्रहालय है।

(ग) इसमें सैनिक रहते हैं ।

(घ) लाल किला ऐतिहासिक स्थान है ।

*****

## त्रयोविंशः पाठः

# वीरः अभिमन्युः



पाण्डुनन्दनस्य अर्जुनस्य नाम कः न जानाति। वीरः अभिमन्युः तस्य एव महाबलस्य पुत्रः आसीत् । श्रीकृष्णस्य भगिनी सुभद्रा अस्य वीरस्य माता आसीत्। अत एव 'सौभद्रः' इति नाम्ना अपि सः प्रसिद्धः ।

बाल्यकालात् एव अभिमन्युः निजपितुः युद्ध-शिक्षां प्राप्नोत् । तस्यां शीघ्रमेव पारंगतः अभवत् । व्यूहभंगस्य दुर्लभां शिक्षाम् अपि सः किशोरावस्थायाम् एव जानाति स्म । सः निजशौर्येण पितरं मातुलं च अनन्दयत्।

महाभारत-युद्धे एकस्मिन् दिवसे नृसिंहः अर्जुनः अन्यत्र युद्धे संलग्नः आसीत् । तदा दुर्योधनस्य प्रियं कर्तुं द्रोणः सु-अवसरं प्राप्य व्यूहम् अरचयत् । सः स्वयं तस्य सेनापतिः अभवत् । महाबलशाली-अर्जुनं विना पाण्डवेषु कोऽपि व्यूहभंगं कर्तुं नाशक्नोत् । युधिष्ठिरः चिन्तातुरः अभवत् । तदा सौभद्रः अकथयत्

''तात, अहं व्यूहभंगं कर्तुं तु शक्नोमि परं तस्मात् निर्गन्तुम् अक्षमः''

आज्ञां प्राप्य अभिमन्युः सहर्षं स्वरथम् आरोहत् । सः सारथिं सुमित्रं द्रोणस्य समीपे स्वरथं नेतुम् आदिशत् । युधिष्ठिरादयः पाण्डवाः युद्धे तम् अन्वसरन्। अभिमन्युः व्यूहभंगं कृत्वा यदा अन्तः प्राविशत्, तदा भीषणं युद्धम् अभवत् । तत्र बहवः योधाः अश्वाः गजाः च अनश्यन् ।

अत्रान्तरे सिन्धुराजः जयद्रथः पाण्डवानां बलम् अग्रेगमनात् अवारयत् । इदानीम् अभिमन्युः एकाकी एव आसीत् । सः तीक्ष्णैः शरैः अरिषु प्राहरत् । तेषां च प्रहारान् निराकरोत् । तस्य पराक्रमेण सर्वे विस्मिताः अभवन् । ते सर्वे मिलित्वा तस्य वधस्य योजनाम् अचिन्तयन्।

ते सहसा अभिमन्युं प्रति सर्वतः प्रहारान् अकुर्वन् । सोऽपि धैर्यं न अत्यजत्। यदा शत्रवः तस्य कार्मुकं छित्त्वा खड्गं च व्यर्थम् अकुर्वन्, तदा सः क्रुद्धो भूत्वा बुभुक्षितः सिंहः इव रथस्य चक्रेण एव अरिषु प्राहरत् । तस्य शरीरं क्षत-विक्षतम् अभवत् । तथापि सः सिंह-शावकः युद्धात् पराङ्मुखः न अभवत्। ते युद्धस्य नियमान् उल्लंङ्घ्य विरथस्य निश्शस्त्रस्य च सौभद्रस्य वधम् अकुर्वन्।

धन्यः सः वीरः-बालकः अभिमन्युः।

**शब्दार्थाः**

महाबलस्य = महारथी का

सौभद्रः = सुभद्रा का पुत्र (अभिमन्यु)

किशोरावस्थायाम् = दस वर्ष से पन्द्रह वर्ष तक की अवस्था

निर्गन्तुम् = (निर् + √गम् + तुमुन्) बाहर निकलने के लिए

तीक्ष्णैः = तेज

कार्मुकम् = धनुष

बुभुक्षितः = भूखे

खड्गम् = तलवार को

छित्त्वा = (√छिद् + क्त्वा) काट कर

भगिनी = बहन

पारंगतः = प्रवीण कुशल

संलग्नः = लगा हुआ

अग्रेगमनात् = आगे जाने से

निराकरोत् = (निर् + √कृ, लङ्, प्र० पु०, ए० व०) निराकरण कर दिया

अरिषु = शत्रुओं पर

अक्षमः = असमर्थ हूँ

बुभुक्षित: = भूखा
सिंह-शावक: = शेर का बच्चा
उल्लङ्घ्य = (उत् + √ लंघ् + ल्यप्) उल्लंघना करके
क्षत-विक्षतम् = जख्मी
पराङ्मुख = विमुख
विरथस्य = रथहीन का
निश्शस्त्रस्य = निहत्थे का

**अभ्यास**

**प्रश्न 1. निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो—**

(क) अभिमन्यु किसका पुत्र था ?

(ख) व्यूह की रचना किसने की ?

(ग) चिन्तातुर युधिष्ठिर को अभिमन्यु ने क्या कहा ?

(घ) कौरवों ने किस अवस्था में अभिमन्यु का वध किया ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति करो —**

चिन्तातुर:, सुमित्रं, कृष्णस्य, अभिमन्यु: ।

(क) ........... भगिनि सुभद्रा अस्य वीरस्य माता आसीत् ।

(ख) वीर: .......... तस्य एव महाबलस्य पुत्र: आसीत् ।

(ग) युधिष्ठिर: ............. अभवत् ।

(घ) सारथिं ........... द्रोणस्य समीपे स्वरथं नेतुम् आदिशत् ।

**प्रश्न 3. रेखांकित शब्दों में निर्देश के अनुसार परिवर्तन करो—**

(क) स: निजशौर्येण पितरं मातुलं च अनन्दयत् ।(प्र० पु०, बहु० व०)

(ख) स: स्वयं तस्य सेनापति: अभवत् । (म० पु०, एक व०)

(ग) अहं व्यूह-भंगं कर्तुं शक्नोमि । (उ० पु०, बहु० व०)

(घ) ते सहसा अभिमन्युं प्रति सर्वत: प्रहारान् अकुर्वन् । (प्र० पु०, द्वि०व०)

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) अभिमन्यु अर्जुन का पुत्र था ।

(ख) युद्ध में बहुत से योद्धा मारे गए।

(ग) उसने तीखे बाणों से शत्रु पर प्रहार किया ।

(घ) पुत्र ने पिता को प्रसन्न किया ।

(ङ) गुरु ने शिष्य को बाहर जाने के लिये कहा।

## चतुर्विंश: पाठ:

# विज्ञानस्य चमत्कार:

अद्यत्वे सर्वत्र विज्ञानस्य राज्यम् अस्ति। इदं वैज्ञानिकं युगम् अस्ति । पुरा जगति यातायातस्य साधनानि ईदृशानि न आसन् । अश्वेन, गजेन, उष्ट्रेण, रथेन वा जना: दूरं स्थानं गच्छन्ति स्म । ते नावा नदी: समुद्रान् च तरन्ति स्म । इदानीं विज्ञानस्य प्रभावेण यातायातस्य साधनानि नवीनानि सुलभानि च सन्ति । यत्र तत्र नगरेषु मोटर-यानानि धावन्ति।

रेलयानेन जना: दूरं स्थानं सुखेन गच्छन्ति । ये जना: स्वल्पेन कालेन दूरं गन्तुम् इच्छन्ति, ते वायुयानेन आकाश-मार्गेण गच्छन्ति । मोटर-यानेन यातायातं सुकरम् अस्ति । जलयानै: समुद्रस्य यात्रा अपि सुखेन भवति ।

'दूरभाष' नामकस्य यन्त्रस्य बहवो लाभा: सन्ति । जना: गृहे स्थिता: एव दूरभाषेण अन्यै: सह वार्तालापं कुर्वन्ति । आकाशवाण्या: आविष्कार: अतीव चमत्कारपूर्ण: अस्ति । अनेन यन्त्रेण जना: गृहेष्वेव भाषणाणां, संगीतानां, समाचाराणां च श्रवणं कुर्वन्ति । 'दूरदर्शन' यन्त्रेण तु वयं वस्तु-चित्रम् अपि पश्याम: ।

विज्ञानस्य चमत्काराणाम् उल्लेख-समये 'कम्प्यूटर' नामकं यन्त्रं न विस्मरणीयम्। अधुना तु वयं वस्तुत: कम्प्यूटर-प्रधान-युगे एव वसाम: । अनेन विना अस्माकं जीवनं अस्मिन् गतिशील-समये कठिनं भविष्यति। कम्प्यूटर-यन्त्रेण वयं विभिन्न-कार्याणि कुर्म: । यथा-तथ्यानां संग्रह: वयं कम्प्यूटर-यन्त्रस्य 'स्मरणपटले' कुर्म: । गणित-कार्याणि अपि कम्प्यूटरेण क्रियन्ते। अस्य यन्त्रस्य बहवो लाभा: सन्ति। यत: वयं यदा कस्यचित् विषये किमपि ज्ञातुम् इच्छाम:, तदा कम्प्यूटर: एकस्मिन् क्षणे एव तद-विषये संगृहतान् सर्वान् तथ्यान् असमद् समक्षे उपस्थापयति। अधुना विभिन्न-कार्यालयेषु कम्प्यूटरेण एव प्राय: सर्वाणि कार्याणि क्रियन्ते।

ये वैज्ञानिका: अस्माकं कृते एतेषां यन्त्राणां आविष्कारम् अकुर्वन्, ते महान्तम् उपकारम् अकुर्वन् । तेभ्य: वयं नमाम: । आधुनिका: वैज्ञानिका:

अधिकानां यन्त्राणां आविष्काराय सततं यत्नं कुर्वन्ति । केचन वैज्ञानिकाः घातकानां अस्त्राणाम् आविष्कारम् अकुर्वन् । अत्र वैज्ञानिकानाम् एव दोषः, न तु विज्ञानस्य ।

### शब्दार्थाः

तृ = (तर्) - पार करना
आविष्कारः = खोज
आकाशवाणी = रेडियो
सुकरम् = सरल
चमत्कारपूर्ण = चमत्कार वाला
उपस्थापयति = उपस्थित करता है
क्रियन्ते = किये जाते हैं
कार्यालयेषु = कार्यालयों में
समक्षे = सामने
न विस्मरणीयम् = न भुलाने योग्य अथवा स्मरण करने योग्य
श्रु = सुनना
दूरभाष = टेलीफ़ोन
वस्तुचित्रम् = वास्तविक तस्वीर
दृष्टिगोचरः = दृष्टि में आना
अस्त्रम् = दूर से फैंकने का हथियार
कस्यचित् विषये = किसी के सम्बन्ध में
संगृहतान् = एकत्रित किये हुए (को)
घातकः = मारने वाला
नमामः = नमस्कार करते हैं

### अभ्यास

**प्रश्न 1 निम्नलिखित प्रश्नों का उत्तर हिन्दी में लिखो।**

(क) प्राचीन काल में यातायात के कौन से साधन थे ?

(ख) वैज्ञानिकों ने यातायात के किन-किन साधनों का आविष्कार किया ?

(ग) 'दूरभाष' यन्त्र से क्या लाभ हैं ?

(घ) कम्प्यूटर का क्या महत्व है ?

**प्रश्न 2. दिए गए शब्दों से रिक्त स्थानों की पूर्ति करो —**

लाभाः, रेलयानेन, विज्ञानस्य, वस्तुचित्रम् ।

(क) ............. जनाः दूरं स्थानं सुखेन गच्छन्ति ।

(ख) दूरदर्शन-यन्त्रेण तु वयं ........... अपि पश्याम : ।

(ग) दूरभाष-नामक यन्त्रस्य बहवो .......... सन्ति ।

(घ) अत्र वैज्ञानिकानाम् एव दोषः, न तु ........... ।

**प्रश्न 3. निम्नलिखित वाक्यों में निर्देश के अनुसार परिवर्तन करो—**

(क) ते नावा नदीः समुद्रान् च तरन्ति स्म । (एक वचन)

(ख) तेभ्यः वयं नमामः । (एक वचन)

(ग) ते वायुयानेन आकाशमार्गेण गच्छन्ति । (द्वि वचन)

(घ) दूरदर्शन यन्त्रेण वयं वस्तुचित्रम् पश्यामः । (एक वचन)

**प्रश्न 4. निम्न तालिका के शब्दों से सार्थक वाक्य बनाओ—**

| | |
|---|---|
| (क) ये जनाः स्वल्पेन कालेन दूरं गन्तुम् इच्छन्ति | दूरं स्थानं सुखेन गच्छन्ति। |
| (ख) रेलयानेन जनाः | अतीव चमत्कारपूर्णः अस्ति। |
| (ग) आकाशवाण्याः आविष्कारः | ते महान्तम् उपकारम् अकुर्वन् । |
| (घ) ये वैज्ञानिकाः अस्माकं कृते एतेषां यन्त्राणाम् आविष्कारम् अकुर्वन् । | ते वायुयानेन आकाशमार्गेण गच्छन्ति। |

**प्रश्न 5. संस्कृत में अनुवाद करो—**

(क) आज का युग विज्ञान का युग है ।

(ख) दूरभाष नामक यन्त्र के बहुत लाभ हैं।

(ग) रेलयान से लोग दूर स्थानों पर जाते हैं।

(घ) हम कम्प्यूटर प्रधान युग में रहते हैं।

*****

पञ्चविंशः पाठः

# देश-रक्षकाः



सुखवीरः — भ्रातः ! इदं कस्य चित्रम् अस्ति ?

राजवीरः — इदं सैनिकस्य चित्रम् अस्ति ।

सुखवीरः — सैनिकः किं करोति ?

राजवीरः — सैनिकः देशस्य रक्षां करोति ।

सुखवीरः — सैनिकः क्व वसति ?

राजवीरः — अयं सेनायाः शिविरे वसति । एतादृशाः बहवः सैनिकाः सेनायां सन्ति। सेनायाः एकः सेनापतिः भवति। सः यथा आदेशं यच्छति, तथैव ते कुर्वन्ति। देशे त्रिविधा सेना भवति—स्थलसेना, जलसेना, वायुसेना च।

सुखवीरः — सेना देशं कथं रक्षति ?

राजवीरः — देशस्य आवश्यकेषु स्थानेषु सेनायाः शिविराणि सन्ति। तत्र सैनिकाः सर्वविधैः शस्त्रैः सज्जिताः सन्ति । देशस्य प्रमुखेषु स्थानेषु वायु-सेनायाः शिविराणि भवन्ति। तत्र नवीनतमानि वायुयानानि सन्ति । एवं समुद्रस्य तटे प्रसिद्धेषु स्थानेषु जल-सेनायाः शिविराणि सन्ति। तत्र सर्वविधा युद्ध-पोताः भवन्ति। सैनिकाः अहर्निशं देशस्य सीमां रक्षन्ति। ते अतीव सावधानाः सन्ति । कोऽपि जलमार्गेण, स्थलमार्गेण वा देशे प्रवेष्टुं न पारयति । जले, स्थले, आकाशे च सैनिकानां गतिः सम्भवति। ते युद्धे शत्रूणां नाशं कुर्वन्ति।

सुखवीरः — यदा युद्धं न भवति, तदा सैनिकाः किं कुर्वन्ति ?

राजवीरः — युद्धस्य अभावाय एव सैनिकाः देशस्य सीमां रक्षन्ति । सैनिकानां शक्तेः भीताः शत्रवः युद्धम् न कुर्वन्ति । शान्तिकाले अपि सैनिकाः जनानां सेवां कुर्वन्ति। यदि क्वचित् जलप्लावनम् अन्या वा काचित् आपत्तिः आगच्छति, तदा सैनिकाः देश-वासिनां रक्षां कुर्वन्ति ।

सुखवीरः — किम् अहम् अपि सैनिकः भवितुं समर्थः अस्मि ?

राजवीरः — कथं न ! यः कश्चित् इच्छति, स्वस्थः च अस्ति, सः सैनिकः भवितुं समर्थः अस्ति ।

## शब्दार्थाः

प्रवेष्टुम् = (प्र + विश् + तुमुन्) (प्रवेश करने के लिए)

अभावः = न होना

रक्षति = रक्षा करता है

युद्ध-पोतः = युद्ध का जहाज

शान्तिकाले = शान्ति के समय

सावधानाः = सावधान

सीमा = सीमा, हद

जलमार्गेण = समुद्री रास्ते से
सम्भवति = सम्भव होती है ।
नवीनतमानि = सबसे नये
त्रिविधा = तीन प्रकार की
सर्वविधैः = सब प्रकार से
सज्जिताः = युक्त (सजे हुए)
भीताः = डरे हुए
आदेशम् = आज्ञा
जल प्लावनम् = बाढ़
शिविरम् = शिविर, छावनी
अहर्निशम् = दिन-रात

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखो—**

(क) सैनिक कहाँ रहते हैं ?

(ख) सेना देश की रक्षा किस प्रकार करती है ?

(ग) देश में कितने प्रकार की सेना होती है ?

(घ) शान्ति के समय सेना क्या करती है ?

**प्रश्न 2. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो —**

(क) <u>सैनिकाः</u> देशस्य रक्षां <u>कुर्वन्ति</u>। (प्र० पु० एक वचन)

(ख) शान्ति काले अपि <u>सैनिकाः</u> जनानां सेवां <u>कुर्वन्ति</u>। (प्र०पु० द्वि व०)

(ग) <u>अहम्</u> अपि <u>सैनिकः</u> भवितुं समर्थः <u>अस्मि</u>। (उ० पु० बहु वचन

(घ) <u>ते</u> युद्धे शत्रूणां नाशं <u>कुर्वन्ति</u> । (म० पु० बहु वचन)

**प्रश्न 3. निम्न तालिका में दिये गए शब्दों से सार्थक वाक्य बनाओ—**

| | | |
|---|---|---|
| (क) | एतादृशाः बहवः सैनिकाः | सेना भवति । |
| (ख) | देशे त्रिविधा | देशस्य सीमां रक्षन्ति । |
| (ग) | सैनिकाः अहर्निशं | जनानां सेवां कुर्वन्ति । |
| (घ) | शान्तिकाले अपि सैनिकाः | सेनायां सन्ति । |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) यह सैनिक का चित्र है।

(ख) समुद्र के तट पर जल सेना के शिविर हैं।

(ग) सैनिक देश की रक्षा करता है।

(घ) सैनिक शत्रुओं का नाश करता है।

षड्विंशः पाठः

# दूर-दर्शनम्



अरुणः — कः समाचारः ?

सुभाषः — अति हर्षदायकः समाचारः ।

अरुणः — शीघ्रं वद।

सुभाषः — अद्य सायंकाले मम गृहम् आगच्छ, तदा तत्र अति अद्भुतं वस्तुं द्रक्ष्यसि, हर्षिष्यसि च, एष एव समाचारः ।

अरुणः — किं युष्माभिः 'दूर-दर्शनम्' आनीतम् ?

सुभाषः — आम् त्वया कथं ज्ञातम् ?

अरुणः — तव मोदेन कथनेन च अनुमितम् ।

सुभाषः — अधुना तु सायंकाले मम गृहम् आगमिष्यसि ?

अरुण: — आम्, अवश्यम् आगमिष्यामि । अद्य दूर-दर्शने कः कार्य-क्रमः आगमिष्यति ?

सुभाष: — अद्य एकं 'चल चित्रम्' आगमिष्यति । अन्यानि मित्राणि अपि तद्दर्शनाय आगमिष्यन्ति ।

(सायं सुभाषस्य गृहे द्वे मित्रे पुनः सम्मिलितः दूर-दर्शनं दृष्ट्वा च अतीव हृष्यतः)

सुभाष: — किं त्वं जानासि ? दूर-दर्शने चित्राणि कथम् आगच्छन्ति ?

अरुण: — इदं तु न जानामि ।

सुभाष: — (संकेतेन प्रदर्श्य) तं दण्डं पश्य ।

अरुण: — एषः तु 'एण्टिना' अस्ति ।

सुभाष: — अयम् आकाशवाणीवत् 'दूर-दर्शन केन्द्रात्' प्रसारितं कार्यक्रमम् आकर्षति ।

अरुण: — दूर-दर्शन केन्द्रं कुत्र अस्ति ?

सुभाष: — अस्माकं राज्ये तु जालन्धर, -नगरे अस्ति ।

अरुण: — कः कः कार्य-क्रमः 'दूर-दर्शनेन' द्वारा दर्शनीयः अस्ति ?

सुभाष: — चलचित्राणि, नाटकानि, क्रीडा-प्रतिस्पर्धाः, चित्रहाराः विविधानि गीतानि च दूर-दर्शनात् दर्शनीयानि श्रवणीयानि च सन्ति ।

अरुण: — एवं तु 'दूर-दर्शनम्' अतीव मनोरंजनकरं ज्ञानवर्धकं च अस्ति।

सुभाष: — आगच्छ, चलचित्रस्य समयः जातः ।

अरुण: — आगच्छामि, आगच्छामि ।

(उभौ दूरदर्शन-पुरतः उपविशतः)

**शब्दार्थाः**

दूर-दर्शनम् = टेलिविजन

अनुमितम् = अनुमान लगाया है

चलचित्रम् = सिनेमा की फिल्म

क्रीडा-प्रतिस्पर्धा = खेल के मैच

उभौ = दोनों

द्रक्ष्यसि = (√ दृश्, लृट्, म० ए० व०) (तू) देखेगा

हर्षिष्यसि = (तू) प्रसन्न होगा

आगमिष्यति = (वह) आएगा

आकर्षति = (आ + (√ कृष्, √लट्, प्र०, ए० व०) (वह) खींचता है

उपविशतः = (उप + √ विश्, लट्, प्र०पु०
द्वि० व०) (वे दो) बैठते हैं  आम् = हाँ

## अभ्यास

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखो—**

(क) हमारे राज्य में दूर-दर्शन केन्द्र कहाँ पर है ?

(ख) दूर-दर्शन में कौन-कौन से कार्यक्रम आते हैं ?

(ग) एण्टिना किसे कहते हैं ?

(घ) दूर-दर्शन के क्या-क्या लाभ हैं ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति करो—**

दूरदर्शनम्, जालन्धर, एण्टिना, सुभाषस्य

(क) किं युष्माभिः ............... आनीतम् ?

(ख) सायं ......... गृहे द्वे मित्रे पुनः सम्मिलितः ।

(ग) एषः तु.............. अस्ति ।

(घ) अस्माकं राज्ये तु ............ नगरे अस्ति ।

**प्रश्न 3. रेखांकित शब्दों में यथानिर्दिष्ट परिवर्तन करो—**

| | |
|---|---|
| (क) <u>अहं</u> एवं न <u>वदिष्यामि</u> | (प्रथम पु० एक वचन में) |
| (ख) किं <u>त्वं</u> <u>जानासि</u> ? | (मध्यम पु० बहु वचन में) |
| (ग) <u>त्वं</u> शीघ्रं <u>वद</u> । | (मध्यम पु० द्वि वचन में) |
| (घ) <u>अहं</u> <u>आगच्छामि</u> । | (उत्तम पु० बहु वचन में) |

**प्रश्न 4. संस्कृत में अनुवाद करो—**

(क) अत्यन्त हर्षदायक समाचार है ।

(ख) आओ, स्कूल का समय हो गया है।

(ग) आज मैं तुम्हारे घर आऊँगा ।

(घ) मेरे और मित्र भी दूर-दर्शन देखने हमारे घर आएँगे।

(ङ) दो लड़के गेंद से खेलते हैं ।

*****

# व्याकरण-भागः

## सन्धि

सन्धि का अर्थ है 'मेल'। 'सन्धि' शब्द सम् उपसर्ग तथा √धा धातु से बना है सम् का अर्थ है अच्छी तरह से और √धा का अर्थ है — मिलाना। अतः अति समीप में आने वाले दो वर्णों के सम्यक् मेल को सन्धि कहते हैं।

जैसे — विद्या + अर्थी = विद्यार्थी

सन्धि तीन प्रकार की होती है — स्वर सन्धि, व्यञ्जन सन्धि तथा विसर्ग सन्धि।

### स्वर सन्धि

दो स्वरों के मेल को स्वर सन्धि कहते हैं। इसके निम्नलिखित भेद हैं।
1. दीर्घ सन्धि 2. गुण सन्धि 3. वृद्धि सन्धि 4. यण् सन्धि 5. अयादि सन्धि।
नोट— पाठ्यक्रम के अनुसार यहाँ पर केवल यण् और अयादि सन्धि का वर्णन किया जाएगा।

**यण्-सन्धि :—** ह्रस्व अथवा दीर्घ इ, उ, ऋ, लृ के बाद कोई असमान (भिन्न, इन स्वरों को छोड़कर कोई दूसरा) स्वर हो तो उसके स्थान पर इ को य्, उ को व् ऋ को र् तथा लृ को ल् हो जाता है ।

| | | | |
|---|---|---|---|
| जैसे —अति + अन्त | = अत्यन्त | पितृ + आदेशः | = पित्रादेशः |
| देवी + आज्ञा | = देव्याज्ञा | मातृ + आज्ञा | = मात्राज्ञा |
| सु + आगतम् | = स्वागतम् | लृ + आकृतिः | = लाकृतिः |
| भू + आदि | = भ्वादि | | |

**अयादि-सन्धि :—** ए, ऐ, ओ, औ के बाद किसी भी स्वर के आने पर ए को अय्, ऐ को आय्, ओ को अव् तथा औ को आव् आदेश हो जाता है —

| | | | |
|---|---|---|---|
| जैसे —कवे + ए | = कवये | भो + अनम् | = भवनम् |
| ने + अनम् | = नयनम् | साधो + ए | = साधवे |
| नै + अकः | = नायकः | पौ + अकः | = पावकः |
| परिचै + अकः | = परिचायकः | भौ + उकः | = भावुकः |

**व्यञ्जन सन्धि :—** व्यञ्जन वर्ण के साथ किसी स्वर या व्यञ्जन के मिलने से जो परिवर्तन होता है, उसे व्यञ्जन सन्धि कहते हैं।

**अनुस्वार विधि :—** पदान्त म् के बाद कोई भी व्यञ्जन आए, तो म् को सदा अनुस्वार ( ं ) हो जाता है। जैसे – ग्रामम् गच्छति = ग्रामं गच्छति

2. न् के बाद यदि अन्तस्थ तथा अनुनासिक को छोड़कर कोई अन्य व्यञ्जन वर्ण आता है तो न् के स्थान में अनुस्वार हो जाता है। जैसे यशान् + सि= यशांसि

**जश्त्व विधि :—**

| | | | | |
|---|---|---|---|---|
| वर्गों के पहले वर्ण (क्, च्, ट्, त्, प्) | + | स्वर, वर्गों के तीसरे, चौथे वर्ण, य्, र्, ल्, व्, ह् | = | पूर्व वर्ण को अपने वर्ग का तीसरा वर्ण ग्,ज्, ड्, द्, ब् |

| | |
|---|---|
| वाक् + ईश: = वागीश: | अप् + ज: = अब्ज: |
| जगत् + ईश: = जगदीश: | अच् + अन्त: = अजन्त: |
| सत् + गति: = सद्गति: | षट् + आनन: = षडानन: |

**लत्व विधि** — तवर्ग के बाद ल् आए तो तवर्ग का ल् हो जाता है। किन्तु न् के बाद ल् के आने पर सानुनासिक लकार लँ होता है।

| | |
|---|---|
| उत् + लेख: = उल्लेख: | उत् + लंघनम् = उल्लंघनम् |
| तद् + लीन: = तल्लीन: | महान् + लाभ: = महाँल्लाभ: |

**श्चुत्व विधि — स्, तवर्ग + श्, चवर्ग = पूर्व वर्ण को क्रमश: श्, चवर्ग**

| | | | | |
|---|---|---|---|---|
| उदाहरण— | रामस् + शान्त: | = | रामश्शान्त: | तत् + च = तच्च |
| | पुनस् + च | = | पुनश्च | तद् + जय := तज्जय: |

**ष्टुत्व विधि — स्, तवर्ग + ष्, टवर्ग = पूर्व वर्ण को क्रमश: ष्, टवर्ग**

उदाहरण — बालस् + षष्ठ: = बालष्षष्ठ:

तत् + टीका = तट्टीका

महत् + टीका = महट्टीका

उद् + डीयते = उड्डीयते

## संज्ञा शब्दों के रूप

### ( क ) ऋकारान्त पुंलिंग शब्द

### कर्तृ = करने वाला

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | कर्ता | कर्तारौ | कर्तारः |
| द्वितीया | कर्तारम् | कर्तारौ | कर्तॄन् |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पंचमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधन | हे कर्तः ! | हे कर्तारौ ! | हे कर्तारः ! |

### धातृ = धारण करने वाला

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | धाता | धातारौ | धातारः |
| द्वितीया | धातारम् | धातारौ | धातॄन् |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः |
| चतुर्थी | धात्रे | धातृभ्याम् | धातृभ्यः |
| पंचमी | धातुः | धातृभ्याम् | धातृभ्यः |
| षष्ठी | धातुः | धात्रोः | धातॄणाम् |
| सप्तमी | धातरि | धात्रोः | धातृषु |
| सम्बोधन | हे धातः ! | हे धातारौ ! | हे धातारः ! |

## पितृ =पिता

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पंचमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन | हे पितः ! | हे पितरौ ! | हे पितरः ! |

## दातृ = देने वाला

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | दाता | दातारौ | दातारः |
| द्वितीया | दातारम् | दातारौ | दातॄन् |
| तृतीया | दात्रा | दातृभ्याम् | दातृभिः |
| चतुर्थी | दात्रे | दातृभ्याम् | दातृभ्यः |
| पंचमी | दातुः | दातृभ्याम् | दातृभ्यः |
| षष्ठी | दातुः | दात्रोः | दातॄणाम् |
| सप्तमी | दातरि | दात्रोः | दातृषु |
| सम्बोधन | हे दातः ! | हे दातारौ ! | हे दातारः ! |

## इकारान्त स्त्रीलिंग शब्द

### मति = बुद्धि

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मतये | मतिभ्याम् | मतिभ्यः |
| पंचमी | मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मतेः | मत्योः | मतीनाम् |
| सप्तमी | मतौ | मत्योः | मतिषु |
| सम्बोधन | हे मते ! | हे मती ! | हे मतयः ! |

### गति = जाना, गमन

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथमा | गति | गती | गतयः |
| द्वितीया | गतिम् | गती | गतीः |
| तृतीया | गत्या | गतिभ्याम् | गतिभिः |
| चतुर्थी | गतये | गतिभ्याम् | गतिभ्यः |
| पंचमी | गतेः | गतिभ्याम् | गतिभ्यः |
| षष्ठी | गतेः | गत्योः | गतीनाम् |
| सप्तमी | गतौ | गत्योः | गतिषु |
| सम्बोधन | हे गते ! | हे गती ! | हे गतयः ! |

## भूमि : ज़मीन

| विभक्ति | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
